No. ४५४१

Title संस्कार पद्धतिः

Author श्री कमलाकर भट्टः

Extent ४५ Age x

Subject धर्मशास्त्रं

संस्कारपद्धतिः

४४४४

4549

F. = 45

पुस्तकंकमलाकरभट्टी आरंभः पत्तरा ४५

२५

क॰म॰भ॰ श्रीगणेशायनमः शुभमस्तु श्रीरामकृष्णतनयः कमलाकरसंज्ञितः श्रीरामंपितरौनत्वासंस्कारा
१ न्वक्ति सांप्रतं १ गौतमः गर्भाधानंपुंसवनंसीमंतोजातकर्मनामकरणान्नप्राशनंचौलोपनयनंचत्वारिवेदव्र
तानिस्नानंविवाहः पंचयज्ञाः अष्टकापार्वणश्राद्धंश्रावण्याग्रहायणीचैत्र्याश्वयुजीतिसप्तपाकसंस्था अग्न्या
धेयमग्निहोत्रंदर्शपूर्णमासौचातुर्मास्यान्याग्रयणंपशुःसौत्रामणीतिसप्तहविर्यज्ञसंस्था अग्निष्टोमोऽत्यग्नि
ष्टोमउक्थ्यः षोडशीवाजपेयोतिरात्रोप्तोर्यामइतिसप्तसोमसंस्था इति चत्वारिंशत्संस्काराः दया: क्षांतिरन
सूयाशौचमनायासोऽमांगल्यमकार्पण्यमस्पृहेतियस्यैतेष्टाचत्वारिंशत्संस्कारा अष्टावात्मगुणाः संब्रह्म राम
णः सायुज्यमाप्नोतीतिचैत्र्यांशूलगवोविष्णुवलिर्वा अन्यैः पंचविंशतिराद्यानिष्क्रमाद्युक्ताः अन्यैः षोडश अथ १
स्वस्तिवाचनं कर्तासुमुखश्चैकदंतश्चेत्यादिपठित्वादेशकालौसंकीर्त्य अमुककर्मकरिष्ये तदंगतयागणे
शपूजनंपुण्याहवाचनंनांदीश्राद्धंचकरिष्ये इत्युक्त्वादक्षिणोत्तरयोर्महीद्यौरितिमंत्राभ्यांभूमिंस्पृष्ट्वा ॐप

धयः समितियवाना कलशो स्थितिकुंभौ संस्थाप्ये मंमे गंगेति जलं गंधद्वारामिति गंधं या ओषधीरिति सर्वौ
षधीः कांडात्कांडादिति दूर्वाः अश्वत्थेवइति पंचपल्लवान् स्योनापृथिवीति सप्तमृदः याः फलिनीरिति
फलं सहिरत्नानीति पंचरत्नानि हिरण्यरूपइति हेमक्षिप्रायुवासुवासाइति वस्त्रेण सूत्रेण वाऽवेष्ट्य पू
र्णादर्वीति पूर्णपात्रे निधाय तत्वायामीति वरुणं संपूज्य कलशस्य मुखे विष्णुः कंठे रुद्रः समाश्रितः मू
ले तत्र स्थितो ब्रह्मा मध्ये मातृगणाः स्मृताः कुक्षौ तु सागराः सर्वे सप्तद्वीपा वसुंधरा ऋग्वेदोथ यजुर्वे सप्त
दः सामवेदो ह्यथर्वणः अंगैश्च सहिताः सर्वे कलशं तु समाश्रिताः अत्र गायत्री सावित्री शांतिः पुष्टि
करी तथा आयांतु मम शांत्यर्थं दुरितक्षयकारकाः सर्वे समुद्राः सरितस्तीर्थानि जलदा नदाः आयां
तु मम शांत्यर्थं दुरितक्षयकारकाः इति संप्रार्थ्य मातृदेवो भव० पितृदे० आचार्यदे० अतिथिदे० आशि
षः प्रार्थयंते एताः सत्या आशिषः संतु अवनिकृतजानुमंडलः कमलमुकुलसदृशमंजलिं शिरस्याधा

२ धायदक्षिणेनपाणिनासुवर्णपूर्णकलशं धारयित्वासकुटुंबोनत्वाजलं स्नावयेत् दीर्घानागानद्योगिरय
स्त्रीणिविष्णुपदानिच तेनायुःप्रमाणेनपुण्याहं दीर्घमायुरस्तु शिवाआपः संतु० सौमनस्यमस्तु० अक्ष
तंचारिष्टंचास्तु० गंधाः पांतु० सुमंगल्यंचास्तु० अक्षताः पांत्वायुष्यमस्तु० पुष्पाणिपांतुसौश्रियमस्तु
2 तांबूलानिपांतुरैश्वर्यमस्तु दक्षिणाः पांतुबहुदेयंचास्तु० इतिविप्रेभ्युदत्वायंकृत्वासर्ववेदयज्ञक्रिया
शुभाः करणकर्मारंभाः शोभनाः प्रवर्त्ततेतन्महमोंकारमादिं कृत्वाऋग्यजुःसामाशीर्वचनंबहुऋषिमतंसंविज्ञा
पुण्यं तंभवद्भिरनुज्ञातः पुण्याहंवाचयिष्ये० वाच्यतामितितैरुक्ते० भद्रंकर्णेभिः द्रविणोदाः० सवितापश्चा०
नमोवः० आपउंदंतुजीवसे० संत्वासिंचामियजुषाप्रजामायुर्धनंच० मनःसमाधीतांयें० समाहित राम
मनसःस्मः० प्रसीदंतुभवंतः प्रसन्नाःस्मः० शांतिरस्तु० पुष्टिः० तुष्टिः० वृद्धिः० अविघ्नं० आयुष्यं० आ २
रोग्यं० शिवंकर्मास्तु० कर्मसमृद्धिः वेदसमृद्धिः० शास्त्रसमृद्धिः० पुत्रसमृद्धिः० धनधान्यसमृ०इष्ट

सपंदस्तु॰ बर्हिर्देशेऽरिष्टनिरसनं॰ यत्पापं तत्प्रतिहतं॰ यच्छ्रेयस्तदस्तु॰ उत्तरेकर्मण्यविघ्नं॰ उत्तरोत्त
रमहरहरभिवृद्धिरस्तु॰ उत्तरोत्तराः क्रियाः शुभाः शोभनाः संपद्यंतां॰ तिथिकरणमुहूर्त्तनक्षत्रसंपद
स्तु॰ तिथिकरणमुहूर्त्तनक्षत्रग्रहलग्नाधिदेवताः प्रीयंतां॰ तिथिकरणेमुहूर्त्तेनक्षत्रेसग्रहेसदैवतेप्रीये
तां॰ दुर्गापांचाल्यौ प्रीयेतां॰ अग्निपुरोगाविश्वेदेवाः प्रीयंतां॰ इंद्रपुरोगामरुद्गणाः प्रीयंतां॰ ब्रह्मपुरोगाः
सर्वेवेदाः प्रीयंतां॰ ऋषयः॰ छंदांस्याचार्यावेदादेवायज्ञाश्चप्री॰ वशिष्ठपुरोगाऋषिगणाः प्री॰ अरुंध
तीपुरोगाएकपत्न्यः प्री॰ ब्रह्मचब्राह्मणाश्चप्री॰ श्रीसरस्वत्यौ प्रीयेतां॰ श्रद्धामेधेप्री॰ भगवतीकात्यायनी
प्री॰ भग॰ माहेश्वरीप्री॰ भग॰ पुष्टिकरीप्री॰ भग॰ तुष्टिकरीप्री॰ भग॰ वृद्धिकरीप्री॰ भग॰ ऋद्धिकरीप्री॰
भगवंतौवि॰कौ प्रीयेतां प्रियतां भगवान्स्वामीमहासेनः सपत्निकः ससुतः सपार्षदः सर्वस्थानग
तः प्रीयतां हरिहरहिरण्यगर्भाः प्रीयंतां सर्वाग्रामदेवताः॰ सर्वाः कुलदेवताः सर्वाइष्टदेवताः हताश्च

२ सद्विषः हताः परिपंथिनः हताअस्यकर्मणोविघ्नकर्त्तारः शात्रवः पराभवंयांतुशाम्यंतुघोराणिशाम्यं
तुपापानि। शाम्यंत्वीनयः। शुभानिवर्धंतां। शिवाआपः संतु। शिवाऋतवः। शिवाअग्नयः। शिवाआहुत
यः। शिवाओषधयः। शिवावनस्पतयः। शिवाअतिथयः। अहोरात्रेशिवेस्यातां। निकामेनिकामेनः पर्ज
न्योवर्षतु। फलवत्योनओषधयः॰ योगक्षेमोनःकल्पतां। शुक्रांगारकबुधबृहस्पतिशनैश्चरराहुकेतुसो
3 मसहिताआदित्यपुरोगाः सर्वेग्रहाः प्रीयंतांभगवान्नारायणः। प्रीयतांभगवान्पर्जन्यः। प्रीयतांभग॰
स्वामीमहासेनः पुण्याहकालान्वाचयिष्येवाच्यतां। उद्वाहेवशाकुने। याज्ययायजति॰ संस्कुरुते॰ यत्पु
ण्यंनक्षत्रंसतत्तदुपकुर्वीतोपव्युषं यदावैसूर्यउदेति॰ अथनक्षत्रंनैति। यावतितत्रसूर्योगच्छेत्॰ राम
यत्रजघन्यंपश्येत्॰ तावतकुर्वीत यत्कारीस्यात्पुण्याहएवकुरुते। तानिवाएतानियमनक्षत्राणि ३
। यान्येवदेवनक्षत्राणितेषुकुर्वीतयत्कारीस्यात्पुण्याहएवकुरुते॰ मसंसरत्कुटुंबिनेमहाजनानम

मस्कुर्वाणाय आशीर्वचनमपेक्षमाणायामुकशर्मणः पुण्याहं भवंतो ब्रुवंत्विति त्रिः। ॐ पुण्याहमिति वि
प्राः। स्वस्तये वायुमुपब्रवाम आदित्यमुदनीयः स्वंति। स्वस्तिन इन्द्रो वृद्धश्रवाः। अग्ने देवा वसवः सोम्या
सः चतस्रो देवी रजराः श्रविष्ठाः। ते यज्ञं पांतु रजसः परस्तात् संवत्सरीणममृतं स्वस्ति। महाभिसा
दि० कर्मणः स्वस्ति भवंतो० तु० त्रिः आयुष्मते स्वस्तीति विप्राः ऋध्यास्म स्तोमं सन्नुयाम। १। सर्वाम्ऋद्धिम्०
य एवं वेद० ऋध्यास्म हव्यैर्नमसोपसद्य। मित्रं देवं मित्रधेयं नो अस्तु। अनूराधान् हविषा वर्धयंतः शतं
जीवेम शरदः सवीराः। त्रीणि त्रीणि वै देवानाम् ऋध्यानि त्रीणि छंदांसि त्रीणि सवनानि त्रय इमे लोकाः ऋ
ध्यामेव तद्वीर्य एषु लोकेषु प्रतितिष्ठति। महाभिसादिकर्मणः ऋद्धिं भव० त्रिः ऋध्यतामिति विप्राः श्रि
ये जातः श्रियतिनीराजनं। श्रिय एवैनं तं० वं वेद०। यस्मिन् ब्रह्माभ्यजयत् सर्वमेतदमुं च लोकमिदमू च सर्वं
तोन क्षत्रमभिजिद्विजित्स श्रियं दधातु हृणीयमानं। अहे बुध्निय मंत्रं मे गोपाय० यमृषयः त्रयीविदा वि

४ दुः।ऋचः समानियजूंषि।साहिश्रीरमृतासतां।मह्यमित्यादि॰ कर्मणः श्रीरस्त्विति॰ तु॰त्रिः।अस्तुश्रीरि
तिविप्राः कुंभाज्जलंपातयेत्।वर्षशतंपूर्णमस्तु।शिवं२ अस्तुगोत्राभिवृद्धिरस्तु।प्राजापतिः प्रीयतां
।शुक्रेभिरंगैरजः।तदप्येषश्लो॰ सवइति॰ ततः कलशाद्वयधारांपातयेत्।वास्तोष्पतेप्र॰ निति चतस्र
भिः।शिवंशिवं३मितिवदेत्।ततोभिषेकः।तत्रपत्नीवामतः।समुद्रज्येष्ठाः४आपइद्धेतिद्वे।इमाअ
५ पइतितिस्रः।देवस्यत्वेतियजुषा।बलायश्रियैयसंसेन्नाद्याय।भूर्भुवः स्वः इंद्रियंवेतिब्राह्मणं।सुरा
स्त्वेतिच।अंतेअमृताभिषेकोस्तु।ततःपीठिचतुर्विंशतिपुंजेषु।गौरीपद्माशचीमेधासावित्रीविज राम
याजया।देवसेनास्वधास्वाहामातरोलोकमातरः।धृतिःपुष्टिस्तथातुष्टिरात्मनःकुलदेवता।गणेशा ४
द्यागौर्यादिषोडशमातृः।ब्राह्मीमाहेश्वरीचैवकौमारीवैष्णवीतथा वाराहीचतथेंद्राणीचामुंडाःसप्त
मातरः।ब्राह्म्यादिसप्तमातृः दुर्गाक्षेत्रगणादिपांश्चावाह्यषोडशोपचारैः संपूज्य।आवाहनेनजा

नामि।मंत्रहीनमिति संज्ञार्थं॰ वृद्धिश्राद्धं कुर्यात्॰ सत्यवसुसंज्ञका विश्वेदेवाः नांदीमुखाः भूर्भुवः
स्वः इदं वः पाद्यं स्वाहा नमः इयं च वृद्धिरिति साक्षतं जलं क्षिपेत्॰ मातृपितामही प्रपितामह्यः नांदीमुखाः
।पितृपितामहप्रपितामहाः नांदीमुखाः ।मातामह मातुः पितामह मातुः प्रपितामहाः सपत्नीका नांदी
मुखाः इदं वः पाद्यं॰ पुनः सत्यवस्विसादि॰ इदं वः आसनं वो धार्यमुपचारकल्पनं स्वाहा नमः इयं च वृद्धिः
।एवं मंत्रादौ पित्रादौ मातामहादौ च पुनः सत्यवस्विसादि॰ वः दास्यमानं युग्मब्राह्मणभोजनपर्याप्त
मन्नं तन्निष्क्रयप्रभूतद्रव्यं वा स्वाहा नमः इयं च वृद्धिः ।एवं मात्रादौ पित्रादौ मातामहादौ च ।ततः उपासंगे गा
यत्तान रइतिपंचाक्षत्न मीमेदंते तिषष्ठी श्रावयितां॰ कृतस्य नांदीश्राद्धस्य स्यकर्मणः यथावत्फल
प्राप्त्यर्थं द्राक्षामलकनिष्क्रयप्रभूतं यथाशक्ति द्रव्यं दक्षिणात्वेन स्वाहा नमः इयं च वृद्धिः ।प्रजापते न त्व
त॰ अनेन नांदीश्राद्धेन नांदीमुखदेवताः प्रीयंतां वृद्धिः ।माता पितामही चैव तथैव प्रपितामही ।।पि

५ तापितामहश्चैवं तथैव प्रपितामहः मातामहस्तत्पिता च प्रमातामहकादयः। एते भवंतु सुप्रीताः प्रयच्छं
तु च मंगलं। इलाम ग्नेइति पात्रे शार्द्धं कृत्वा० उत्तिष्ठ ब्रह्मणस्पते० अभ्यारमि० यांतु देवगणा इति मात्रवि
सर्जनं इति कमलाकरभट्टकृत पुण्याहवाचननांदीश्राद्धप्रयोगः अथ दुष्टरजोदर्शनशांतिः पि
तृकृताः कर्त्ता मम पत्न्याः प्रथमरजोदर्शने दुष्टमासादितिथिनक्षत्रादिसूचितसर्वारिष्टशांत्यर्थं स
नवग्रहमखां रजोदर्शनशांतिं करिष्ये इ संकल्प्य गणेशपूजानांदीश्राद्धं तं कृत्वाऽऽचार्यमृत्विजश्च वृणु
यात्। आचार्यः ऐशानेमध्येदक्षिणोत्तरयोश्च सर्वत्र मंत्रावृत्तिः। मही द्यौरिति भूमिं स्पृष्ट्वा ओषधयः
समिति द्रोणप्रमाण व्रीहिराशित्रये आकलशेष्विति कुंभत्रयं संस्थाप्य प्रसुव आप इति नवानां सिंधु राम ५
क्षित् प्रियमेधो नघो जगतीयाः प्रवतो वसिष्ठो नद्यः शाक्करीश्चाभ्यां जलेनापूर्य० गंधद्वारामिति गं
धं। याओषधीरिति सर्वौषधीः। ओषधयः समिति यवांश्च त्रिशुक्लि स्त्रामध्यकुंभे यव व्रीहि तिलमा

षकं गुश्यामाक मुद्गान् क्षिप्त्वा गायत्र्योदुंबरकुशा दूर्वा रक्तोत्पल चंपक बिल्व विष्णुक्रांता तुलसी बर्हि

षशंखपुष्पी शतावर्यश्वगंधा निर्गुंडी रक्तपीत सर्षपापामार्ग पलाश पनस वंधूक प्रियंगु गोधूम व्रीह्य

श्वत्थ दधि दुग्ध घृत पद्मपत्र नीलोत्पल सित रक्त पीत कुरंटक गुंजा वचा भद्रक मुस्ताख्यानि द्वात्रिंश

दौषध्यानि यथासंभवं वा क्षिपेत्। ततस्त्रिषु कांडात्कांडादिति दूर्वा अश्वत्थे वइति पंचपल्लवान् स्योनेति

सप्तमृदः। याः फलिनीरिति फलं सहिरलीति पंचरत्नानि हिरण्यरूपइइति हेम च क्षिप्त्वा सुवासुवा सा इ

ति वस्त्रेणा वेष्ट्य पूर्णा दर्वीति यवादि पूर्णपात्राणि सवस्त्राणि निधाय पत्रापुष्ट दलानि कृत्वा मध्ये गायत्र्या

भुवनेश्वरी मायाख्य दक्षिण कुंभे इंद्राणी वृषाकपिरिंद्राणी पंक्तिः इंद्राणी उत्तरकुंभे इंद्र त्वाविश्वामित्र इंद्रो

गायत्री इतींद्र मावाह्य तन्मंत्रैः षोडशोपचारैः पूजयेत्॰ ततो मध्यकुंभं स्पृष्ट्वा गायत्रीमष्ट सहस्रं अ

ष्टशतं वा जपेत्॥ हिरण्यवर्णामिति पंचदशानां कर्दमानंदचिक्लीतेंदिरासुता ऋषयः। श्री र्देवता॥ तिस्रो

६ नुष्टुभः॰ एकाप्रस्तारपंक्तिः द्वे त्रिष्टुंभावष्टावनुष्टुभौ साप्रस्तारपंक्तिः जपेविनियो॰ एकऋत्विग्दक्षिणकुं
भेकद्रुद्रायेतिनवानां घोरः कण्वो रुद्रोगायत्री॰ इमारुद्रायतवसइत्येकादशानांकुत्सोरुद्रोजगती॰ अं
त्येत्रिष्टुभौ॰ आतेपितरितिपंचदशानां गृत्समदोरुद्रस्त्रिष्टुप्॰ इमारुद्रायस्थिरधन्वनेगिरइतिचतुर्णां
6 कण्वोरुद्रस्त्रिष्टुप्॰ आवोराजानंवामदेवोरुद्रस्त्रिष्टुप्॰ तमुष्टुहिभौमोत्रीरुद्रस्त्रिष्टुप्॰ भुवनस्यपित
रंऋजिश्वारुद्रस्त्रिष्टुप्॰ त्र्यंबकंवशिष्ठोरुद्रोनुष्टुप्॰ अथान्यउत्तरकुंभेरुद्रैकादशानीन्यासादिपूर्व
कंजपेत्॰ शान्नइंद्राग्नीतिपंचदशानोवशिष्ठोविश्वेदेवास्त्रिष्टुप्॰ इतिजपे॰ अथाग्निंप्रतिष्ठाप्येशान्यां
ग्रहान्स्थापयेत् प्रणवस्यपरब्रह्मऋषिः परमात्मादेवता॰ दैवीगायत्रीछंदः॰ व्याहृतीनांक्रमेण राम
जमदग्निभरद्वाजभृगवोऋषयः॰ अग्निवायुसूर्यप्रजापतयोदेवताः॰ दैवीगायत्रीदैव्युष्णुक्दै ६
वीबृहत्यश्छंदांसि॰ सूर्योघावाहनेविनियोगः॰ ग्रहपीठमध्येवर्तुलेद्वादशांगुलेमंडलेप्राङ्मुखंस

र्यं रक्तपुष्पाक्षतैः आकृष्णेन हिरण्यस्तूपः सविता त्रिष्टुप्० सूर्यावाहने विनि० आकृष्णेन० ॐ भूर्भुवः
स्वः कलिंगदेशोद्भव काश्यपसगोत्र सूर्येहागच्छेह तिष्ठेति स्थापयेत्० आग्नेये चतुरस्रे चतुर्विंशांगु
ले प्रत्यङ्मुखं सोमं श्वेतपुष्पाक्षतैः आप्यायस्व गोतमः सोमो गा० आप्यायस्व० ॐ भूर्भुवः स्वः यमु
नातीरोद्भव आत्रेयसगोत्र सोमेहागच्छ० दक्षिणे त्रिकोणे त्र्यंगुले दक्षिणामुखं भौमं रक्तपुष्पाक्षतैः अ
ग्निर्मूर्धा विरूपो अंगारको गायत्री० अग्निर्मूर्धा० ॐ भूर्भुवः स्वः अवंतीसमुद्भव भारद्वाजसगोत्र भौमेहा०
ईशान्ये बाणाकारे चतुरंगुले उदङ्मुखं बुधं पीतपुष्पाक्षतैः उद्बुध्यस्वं बुधः सौम्यो बुधस्त्रिष्टुप् ॐ भू
र्भुवः स्वः मगधदेशोद्भव आत्रेयसगोत्र बुधेहा० उत्तरे दीर्घचतुरस्रे षडंगुले उदङ्मुखं गुरुं पीतपु
ष्पाक्षतैः बृहस्पते गृत्समदो बृहस्पतिस्त्रिष्टुप्० भूर्भुवः स्वः सिंधुदेशोद्भव आंगिरससगोत्र बृहस्पतेहा
गच्छेह० पूर्वे पंचकोणे नवांगुले प्राङ्मुखं शुक्रं शुक्लपुष्पाक्षतैः शुक्रः पराशरः शुक्रो द्विपदा विराट्

७ ॐ भूर्भुवः॰ भोजकटदेशोद्भव भार्गवसगोत्र शुक्र इहा॰ पश्चिमे चतुषिद्व्यंगुले त्रसङ्. मुखं शनिं कृष्णपु
ष्पाक्षतैः शमग्निरग्निः ति ठः शनिरुष्णिक् ॐ भूर्भुवः सौराष्ट्रदेशोद्भव काश्यपसगोत्र शनैश्चर इहा॰
नैरृत्ये शूर्पाकारे द्वादशांगुले दक्षिणमुखं राहुं कृष्णपुष्पाक्षतैः कया नो वामदेवो राहुर्गायत्री ॐ भूर्भु
वः राठीनापुरोद्भव पैठीनसिसगोत्र राहो इहा॰ वायव्ये ध्वजाकारे षडंगुले दक्षिणामुखं केतुं धूम्रपु
ष्पाक्षतैः केतुं मधुच्छंदाः केतुर्गायत्री ॐ भूर्भुवः अंतर्वेदिसमुद्भव जैमिनिसगोत्र केतो इहागच्छेह॰
ततो यथोक्तकुसुमतंदुलाभावे यथामिलितोपचारैः स्थापयेत्॰ अथाधिदेवताः त्र्यंबकं वासिष्ठो रु
द्रोनुष्टुप् त्र्यंबक इहागच्छ॰ सूर्यदक्षिणपार्श्वे गौरीर्मिमाय दीर्घतमा उमा जगती॰ उमे इ॰ सोमदक्षि राम
णपार्श्वे यदाक्रंद दीर्घतमा स्कंद त्रिष्टुप्॰ स्कंद इहाग॰ भौमदक्षिणपार्श्वे॰ विष्णोर्नुकं दीर्घतमा विष्णु ७
स्त्रिष्टुप्॰ विष्णो इ॰ बुधदक्षिणपार्श्वे। ब्रह्मजज्ञानं गोतमो वामदेवो ब्रह्मा त्रिष्टुप् ब्रह्मन्नि॰ ति॰ गुरुदक्षि

पार्श्वे इंद्र वो मघु इंद्रो गा० इंद्रेहा ग० शुक्र दक्षिणपार्श्वे० यमाय सोमं यमोयमोत्रुष्टुप्० यमेहा० श

नि दक्षिण पार्श्वे० मो षुणो घोरः कण्वः कालो गा० कालेहा० राहु दक्षिणपा० उषो वाजं प्रस्कण्वश्चित्रगु

प्तो वृहती चित्रगुप्तेहा गच्छ केतु दक्षिण पार्श्वे अथ प्रत्यधिदेवताः अग्निं कण्वो मेधातिथिरग्निर्गायत्री

अग्ने इहाः सूर्य वाम पार्श्वे० अप्सु मे धातिथिरापो नुष्टुप् आप इहा० सोम वाम पार्श्वे० स्योना मेधाति

थिर्भूमिर्गायत्री भूमे इहा० भौम वाम पार्श्वे० इदं विष्णुर्मेधातिथिर्विष्णुर्गाय० विष्णो इहा० बुध वाम

पार्श्वे० इंद्र श्रेष्ठानि गृत्समद इंद्रस्त्रि० इंद्रेहा० गुरु वामपा० इंद्राणी वृषाकपिरिंद्राणी पंक्तिः इंद्राणी

हा० शुक्र वामपा० प्रजापते हिरण्यगर्भः प्रजापतिस्त्रि प्रजापते हा ग० शनि वाम पार्श्वे० आयं गोः

सार्पराज्ञी सर्पा गायत्री सर्पाः इहा० तिष्ठते तिराहु वाम पार्श्वे० ब्रह्म जज्ञानं गोतमो वामदेवो ब्रह्मा त्रि

ष्टुप् ब्रह्मन्निहागच्छेति केतु वामपा० गणानां त्वा गृत्समदो गणपतिर्जगती० गणपते इ० राहोरुत्तरतो

८ विनायकं॰ जातवेदसे कश्यपो दुर्गा त्रिष्टुप्॰ दुर्गाह्वा॰ शानेरुत्तरतो दुर्गां॰ तव वायो अथ्वांगिरसो वायु
र्गायत्री॰ वायो ह्वं॰ रवेरुत्तरतो वायुं॰ आदित्यस आकाशो गायत्री॰ आकाशो ह्वा॰ राहो दक्षिणत आका
शं॰ एषो उषा प्रस्कण्वोश्विनौ गा॰ अश्विनाविहागतमिह तिष्ठतं केतोर्दक्षिणत अश्विनौ॰ यद्वावि
8 नायकादीन् पंचोत्तरत एव॰ वास्तोष्पते वशिष्ठो वास्तोष्पतिस्त्रिष्टुप्॰ उत्तरे वास्तोष्पतिं॰ क्षेत्रस्य वाम
देवः क्षेत्राधिपतिरनुष्टुप्॰ तत्रैव क्षेत्रपालं॰ ततः पूर्वादिदिक्षु इंद्राद्यष्ट लोकपालान्॰ इंद्रं विश्वाजे
तामाधुच्छंदस इंद्रोनुष्टुप्॰ अग्निं काण्वो मेधा॰ अग्निर्गायत्री॰ यमाय सोमं यमो यमोनुष्टुप्॰ मोषुणो राम
घोरः कण्वो निर्ऋतिर्गायत्री॰ तन्नो अग्ने वामदेवो वरुणस्त्रिष्टुप्॰ तव वायो अथ्वांगिरसो वायुर्गायत्री॰ ८
सोमो धेनुं गौतमः सोमस्त्रिष्टुप्॰ तमीशानं गोतमं ईशानो जगती गायत्री॰ तदस्तु मित्रावरु॰ गृहा वै इ
ति प्रतिष्ठाप्य॰ ततो ध्यानानि॰ पद्मासनः पद्मकरः पद्मगर्भसमद्युतिः। सप्ताश्वरथसंस्थश्च द्वि

भुजः स्यात्सदा रविः १ श्वेतः श्वेतांबरधरो दशाश्वः श्वेतभूषणः गदापाणिर्द्विबाहुश्च कर्त्तव्यो व
रदः शशी ॥२॥ रक्तमाल्यांबरधरः शक्तिशूलगदाधरः ॥ चतुर्भुजो मेषगर्भो वरदः स्यात्धरासुतः ॥३॥
पीतमाल्यांबरधरः कर्णिकारसमद्युतिः ॥ खड्गचर्मगदापाणिः सिंहस्थो वरदो बुधः ॥४॥ देवदैत्यगु
रू तद्वत्पीतश्वेतौ चतुर्भुजौ। दंडिनौ वरदौ कार्यौ साक्षसूत्रकमंडलू ॥५॥६॥ इंद्रनीलद्युतिः शूली वर
दो गृध्रवाहनः ॥ वाणबाणासनधरः कर्त्तव्योर्कसुतः सदा ॥७॥ करालवदनः खड्गचर्मशूली वरप्रदः ॥
नीलः सिंहासनस्थश्च राहुरत्र प्रशस्यते ॥८॥ धूम्राद्विबाहवः सर्वे गदिनो विकृताननाः ॥ गृध्रासनग
तानि संकेतवः स्युर्वरप्रदाः ॥९॥ सर्वे किरीटिनः कार्या ग्रहा लोकहितावहाः ॥ अंगुलेनोछ्रिताः सर्वे श
तमष्टोत्तरं सदेति ॥१०॥ ततः षोडशोपचारैः संपूज्येशान्यां कुंभे वरुणं संपूज्य कलशप्रार्थना ॥ देवदान
वसंवादे मथ्यमाने महोदधौ ॥ उत्पन्नोसि तदा कुंभ विधृतो विष्णुना स्वयं ॥ त्वत्तोये सर्वतीर्थानि देवाः

२ सर्वेत्वयिस्थिताः।त्वयितिष्ठंतिभूतानित्वयिप्राणाः प्रतिष्ठिताः।शिवः स्वयंत्वमेवासिविष्णुस्त्वं चप्रजापतिः
आदित्यावसवोरुद्राविश्वेदेवाः सपैतृकाः॥त्वयितिष्ठंतिसर्वेपियतः कामफलदाः॥त्वत्प्रसादादिमंय
ज्ञंकर्तुमीहेजलोद्भव॥सान्निध्यंकुरुमेदेवप्रसन्नोभवसर्वदेति॥ ततोन्वाधानं॥चक्षुष्यंतेनवग्रहान्
१ प्रत्येकममुकसंख्याभिः समिच्चर्वाज्याहुतिभिः अधिदेवादीनेकैकयाहुत्याप्रत्यधिदेवादीनेकैकया
हुत्याविनायकादिपंचदेवान्वास्तोष्पतिं क्षेत्रपालं इंद्रादिदशलोकपालानेकैकयाहुत्याभुवनेश्वरीप्र
त्येकंदूर्वातिलमिश्रगोधूमपायसाज्यानांअष्टशताष्टाविंशत्यन्यतराहुतिभिरिंद्राणीमिंद्रंचप्रत्येकममुक
द्रव्यैरष्टाविंशत्यष्टान्यतराहुतिभिर्यक्ष्ये। शेषेणस्विष्टकृतमित्याद्युक्तदेवेभ्योऽमुष्मैत्वाजुष्टंनिर्वपामी राम
तिचतुरश्चतुरोमुष्टीन्निरुप्यतथैवप्रोक्ष्यक्षीरेचरुंकृत्वाज्यभागांतेयजमानेनत्यागेकृतेउक्तसंख्या १
यायथाक्रमेणऋत्विग्भिर्होमः कार्यः तत्रतिसृभिर्दूर्वाभिर्दधिमध्वाज्याक्ताभिरेकाहुतिः एवंसमिधोः

ष्यक्ताः ततः स्विष्टकृदादि प्रायश्चित्त होमांते दिदिक्पालेभ्यो नवग्रहेभ्यो भुवनेश्वरी रुद्राणींद्रेभ्यः क्षेत्रपाला
यसदीपमाषभक्तबलीन्दत्वा समुद्रादूर्मिरितित्टचस्य वामदेवाग्निस्त्रिष्टुप् इति पूर्णाहुतिं हुत्वा प्रणीताविमोकादिशेषसमाप्तौ यजमानमभिषिंचेत्॥ आपो हि ष्ठेति नवभिः परकद्विस्यतइति त्टचस्य गोतम मरुद्रस्त्रिष्टुभिस्तूंदेवेति सप्तानां वसिष्ठस्त्रयाणामग्निस्ततो विश्वेदेवा आद्या गायत्री ततोनुष्टुप्॰ तिस्रो गायत्र्यो
सेनुष्टुभौ॰ उभयंशृणवच्चनेति भर्गइंद्रोवृहती॰ स्वस्तिदा विशोपमइंद्रोनुष्टुप्॰ त्र्यंबकं व॰ रुद्रोनु॰
प॰ जातवेदसे कश्यपो दुर्गा त्रिष्टुप्॰ समुद्रज्येष्ठा अत्रुर्णा वसिष्ठ आपस्त्रिष्टुप्॰ त्रायंतांइमापइतिच
तस्रणां सप्तर्षय आपोनुष्टुप्॰ देवस्येति आपस्तं बयास्वीयै स्त्रिष्टुप्॰ तमीशानं गौतम ईशानो जगती॰
त्वमग्ने रुद्रः तमुष्टुहीत्यां गिरसास्तिरश्ची रुद्रस्त्रिष्टुप्॰ भुवनस्य पितरं॰ याते रुद्र कश्यपो रुद्रः स्वरा
नुष्टुप्॰ य जाग्रत इतिषण्णां प्रजापतिर्मनस्त्रिष्टुप् इंद्रत्वा लषभं वयं पंचानां विश्वामित्र इंद्रो गायत्री॰

१० ततः सुरास्त्वे सादिरभिषिक्तोऽग्निं संपूज्याचार्याय धेनुं रुद्रजापिनेऽनड्वाहं सदक्षिणमन्येभ्यश्च दक्षिणां
दत्वा देवानामुत्तरपूजां कृत्वा विसृज्याचार्यहस्ते दत्वाग्निं संपूज्य गच्छ गच्छेति विसृज्य महाशांतिं पठित्वा
विप्रान् संभोज्य भुंजीत इति कमलाकरभट्टकृतौ रजोदर्शनशांतिः ॥ अथ नष्टाग्नेः पुनः संधानं
10 कर्त्ताऽग्निविच्छेदकालगणनयाः पादिप्रत्यब्दकृच्छ्रं कृत्वा सायं प्रातर्होमदर्शपूर्णमासस्थालीपाक
विच्छेदनिमित्तं तत्सर्यां प्रतत्री ह्यादिद्रव्यं दत्वा देशकालौ स्मृत्वा विच्छिन्नस्य नष्टस्याग्नेः पुनः संधानं करिष्ये
इत्युक्त्वाऽग्निं प्रतिष्ठाप्याधारावाज्येनेसंतेऽग्निं पवमानमग्निं प्रजापतिं वाज्येनार्यमाग्निं वरुणाग्निं पूज्या
ग्निं प्रजापतिं च त्वा जड्ड्येनास्त्र यो सा विश्री चतुर्वारमाज्येन शेषेणास्विष्टकृत मिसाधारांतेऽग्न आयू राम
षीतीति स्तृणां शतं वेस्वान सा अग्निः पवमानो गायत्री ० होमे वि० इति त्रिभिर्हृदयं हुत्वा त्वमर्यमा वसुश्रुतो १०
ऽग्निस्त्रिष्टुप् ० अग्नय इदं ० प्रजापते न त्वदिति चाज्यं हुत्वा पत्नीं जलाद्युपस्तीर्य द्विर्लाजानाधाय हविरवत्तं

चाग्निर्धार्यो यमणं करूपं पूषणमिति त्रयाणां वामदेवो यमाग्निर्वरुणाग्निः पूषाग्निरनुष्टुप् ० इति त्रिभिराज्या

नहुत्वा प्रजापतये स्वाहेति स्रुवपुटेन हुत्वा आनः प्रजामिति चतुर्णां सूर्या सावित्री २ आद्या जगती द्वि

तीया त्रिष्टुप् अंसे अनुष्टुभौ इत्साज्यं हुत्वा समंजन्त्विति सूर्या सा २ अनुष्टुप् इति दधिआज्य पत्न्यै दत्वा आज्य

शेषेण वा हृदयमंक्त्वा स्विष्टकृदादि होमशेषं समापयेत् इति पुंसवनं अथ गर्भाधानं कर्त्ता देश

कालौ संकीर्त्य अस्यां भार्यायां जनिष्यमाण सर्वगर्भाणां बीजगर्भजैनोनाशद्वारा प्रतिगर्भसंस्कारातिशया

र्थं परमेश्वरप्रीत्यर्थं गर्भाधानं करिष्ये तदंगत्वेन गणेशपूजा पुण्याहवाचन मातृकापूजा नांदीश्राद्धानि

कृत्वा गृह्याग्निं मारुतसंज्ञं प्रज्वाल्य अस्मिन्नन्वाहितेऽग्नावित्यादि चक्षुष्यंते प्रजापतिं चरुणा विष्णुं षड्भा

रमाज्येन प्रजापतिं चाज्येन शेषेण स्विष्टकृतमित्यादि प्रजापतयेमंत्र चरुं श्रपयित्वा चक्षुष्यंते चरुम

वदाय ॐ प्रजापतये स्वाहेति हुत्वा विष्णुर्योनिं त्रयाणां त्वष्टा विष्णुरनुष्टुप् ॐ विष्णुर्योनिं गर्भं धेहि ० हि

११ रण्ययी अरणीपंइत्साअंहुत्वा नेजमेषेति तिसृणां त्वष्टा विष्णुरनुष्टुप्॰ नेजमेष॰ यथेयं पृथिवी विष्णोः॥ अ॰
प्रजापतेनत्वदिति चाज्यं हुत्वा॰ अपनः शोशुचदघमिसप्तानां कुत्सोग्निर्गायत्री॰ पत्न्यामूर्द्धाभिमर्शने वि
नियोगः याः फलिनी रिसस्याथर्वणोभिषगोषधयो नुष्टुप्-जपेवि॰ याः फलिनीः॰ वचेनदस्युमिति षण्णां
वसुश्रुतोग्निस्त्रि॰ अग्न्युपस्थाने विनियोगः वचेनदस्युं॰ ६ अग्निस्तुविश्रममिति द्वयोर्वसूयवोग्निरनु॰
अग्निस्तुविश्र॰ अग्निर्ददाति॰ ३ सग्निमुपस्थाय॰ सूर्यो नोदिवहृति पंचानां चक्षुः सूर्यो गायत्री इति सूर्य
मुपस्थाय तद्दारात्रौ वाश्वगंधाया दूर्वाया वा कल्कं वस्त्रेक्षिप्त्वा उदीर्येति द्वयोः सूर्या सावित्री २ आद्याऽत्रि
ष्टुवंत्यानुष्टुविति स्त्रा ह्रां तेन भार्याया दक्षिणनासायां रसमासिञ्च्य रसे उदरंगते तामाचमय गंधर्वस्य वि राम
श्वावसो मुखमसि॰ विष्णुर्योनिमिति त्रिभिर्नेजमेषेति चतुर्भिश्च योनिमभिमृश्यतां शूषन् सूर्या सावित्री ११
२ त्रिष्टुप् योगर्भमोषधीनां वसिष्ठः पर्जन्यो गाय॰ अहं गर्भं प्रजावान् प्राजापत्यो गर्भ इंद्रस्त्रिष्टुप्॥ अ

हंगर्भमदधामो अहंप्रजा॰ इतिस्त्रिमंगलामाणेरे तोदध्याम्यसौ॰ यथाभूमिरग्निगर्भा यथाद्यौरिंद्रेणगर्भि
णी॰ वायुर्यथादिशांगर्भएवं तेगर्भंदधाम्यसावितिस्वनामोक्त्वास्विष्टकृदादिशेषंसमाप्य शतंदशवाविप्रान्
भोजयेत् इतिगर्भाधानं अथपुंसवनानवलोभनसीमंताः तृतीयेचतुर्थेषष्ठेष्टमेवामासिमृगपुनर्वसु
पुष्यहस्तानुराधाश्रवणेपुंनक्षत्रेसीमंतेनसह कार्याः कर्तोविता नछायायांगृह्यमग्निंकृत्वाप्राग्ग्रीवेरक्ते
आनडुहेचर्मणिपत्नीमुपवेश्यदेशकालौसंकीर्त्य स्वांभार्यायांजनिष्यमाणसर्वगर्भाणां वैजिकगार्भिक
दोषनाशपुंरूपतात्तानोदयास्थिस्थिप्रतिरोधिनाशद्वाराश्रीपरमेश्वरप्रीत्यर्थंपुंसवनमनवलोभनंचतथा
तनुरुधिरप्रियालक्ष्मीभूतराक्षसीगणनाशक्षममहालक्ष्मीसमावेशार्थंप्रतिगर्भंबीजगर्भजैनोनाशा
र्थंचसीमंतोन्नयनंचतंत्रेणकरिष्ये इतिसंकल्प्य गणेशपूजापुण्याहवाचनमातृकापूजानांदीश्राद्धा
निकृत्वामंगलसंज्ञंस्थापयित्वाग्निंनिधायास्मिन्नन्वाहितेग्नाविसादिचक्षुष्यंतेप्रजापतिंचरुणातथासीमंतो

१२ ज्यनहोमेद्धिर्धातारंद्धीराकांत्रिर्विस्नुं प्रजापतिं चाज्येनशेषेणाखिष्टकृतमित्यादि प्रजापतयेत्वाजु

12 ष्टंनिर्वपामीतिनिरुप्यचरुंकृत्वाऽज्यसंस्कारांते आत्मानमग्निंचांतरापत्नीमाचांतामानीमस्वदक्षिण

तश्चर्मण्युपवेश्यतया अन्वारब्धआज्यभागांतेपत्नीहस्तेसमानवर्णायाः प्रसूतिमितंगोर्दधितत्रपूर्वो

यतंयवंतसार्ध्वयोर्द्धौमाषोनिधायकिंपिबसीतित्रिः पृष्ट्वापुंसवनमितिसाक्षिरुक्त्वाप्राश्याचम्यपुनरे

वंद्धिः प्राश्याचामेत् इदंपुंसवनं ततोदूर्वाकल्कंकन्यया प्रेषमिलावस्त्रेगृहीत्वापत्न्याः दक्षिणना

सापुटे गुष्ठाग्रेणस्रूक्रुद्वयांतरं संसिंचेत् ॐ आतेगर्भोयोनिमैतुपुमान्बाणइवेषुधिं॥ आवीरोजाय

तांपुत्रस्तेदशमास्यः ॥१॥ करोमितेप्राजापत्यमागर्भोयोनिमैतुते॥ अनूनःपूर्णोजायतामश्लोणोपि राम

शाचधीतः ॥२॥ पुमांस्तेपुत्रोनारितंपुमाननुजायतां॥ तानिभद्राणिबीजानृषभाजनयंतुनौ ॥३॥ आया १२

निभद्राणिबीजानृषभाजनयंतिनः॥ तैस्त्वंपुत्रान्विंदस्वसाप्रसूर्धेनुकाभव ॥४॥ कामःसमृध्यतां

मह्ममपराजितमेवमे॥ यंकामंकामयेदेवतंमेवायोसमर्धय॥५॥तयाअग्निरेतुप्रथमोदेवतानांसो
स्येप्रजांमंचतुमसुपाशात्‌तदयंराजावरुणोनुमन्यतांयथेयंस्त्रीपौत्रमघंनरोदात्‌॥१॥इमामग्निस्त्रा
यतांगार्हपत्यः प्रजामस्येनयतुदीर्घमायुः॥अश्वन्योपस्माजीवतामस्तुमातापौत्रमानंदमभिप्रबुध्यता
मियं॥२॥मातेगृहेनिशिघोषउत्थादन्यत्रत्वद्रुदंत्यः संविशंतु॥मात्वंविकेश्युरआवधिष्ठाः जीवपत्नीपति
लोकेविराजपश्यंतीप्रजांसुमनस्यमाना॥३॥अप्रजस्तांपौत्रमसुंपाप्मानमुतवाघं॥शीर्ष्णः स्रजमिं
वोन्मुच्यद्विषद्भ्यः प्रतिमुंचामिपाशं॥४॥देवकृतंब्राह्मणकल्प्यमानंतेनहन्मियोनिषदःपिशाचान्‌॥
क्रव्यादोमस्तूनधरान्पातयामिदीर्घमायुस्तवजीवंतुपुत्राः॥५॥इति५मंत्रैर्नस्वेदत्तेतामाचमय्यव
रूमवदायप्रजापतयेस्वाहेतिहुत्वायत्तेसुशीमेहृदयेहितमंतः प्रजापतौमन्येहंमांतद्विद्वांसंमाहंपौत्र
मघंनियामितिपत्न्याहृदयंस्पृष्ट्वासीमंतेस्रुवेणाज्यंजुहुयात्‌धातादधातिद्वयोर्हिरण्यगर्भोधाता

१३ त्रुष्टुप्० अं सा त्रिष्टुप् होमे विनि० धातादादातुदाशुषे प्राचीं जीवातुमक्षितां॥ वयं देवस्य धीमहि सुमतिं
वाजिनीवत: स्वाहा धात्र इदं० धाता प्रजानामुत राय ईशे धातेदं विश्वं भुवनं जजान॥ धाता कृष्टीरनि
मिषाभिचष्टे धात्र इध्मं घृतवज्जुहोत स्वाहा धात्र इदं० राकामहं हृयोग्य त्समदो राका जगती० राकाम
हं० या स्ते राको इति द्वे नेजमेषेति त्र्याणां त्वष्टा विष्णु रनुष्टुप्० नेजमेष० यथेयं पृथिवी० विष्णो: श्रे
ष्ठेनेति० विष्णव इदं० प्रजापते न त्वदिति जाप्यं दुल्याप त्या: पश्चात् स्विष्टकृदुदुंबर गुच्छद्वयं त्रि: शुक्लश
ललीकुशात्रयेणैकीकृतेन अग्रमध्यादाशिरसं० व्याहृतीनां प्रजापति: २ बृहती० ॐ भूर्भुव: स्वरोमि
ति ऊर्ध्वमंत्रार्थ सा त्रिश्चतुर्वा सीमंतमुन्नयेत् गुच्छं तत्रैव संस्थाप्य गोधूमपिष्टोदुंबरफलमालां कंठे द राम
त्वा सोमएव राजानं संगायेतां इति वीणागाथिनौ द्विजौ संप्रेष्य सोमो नो राजावतु मानुषी: प्रजा निविष्ट १३
चक्रा गंगे इति समीपनद्या नाम्ना त्रिर्गायेतां० स्विष्टकृदादि शेषं समाप्य० ब्राह्मणेभ्य स्नैवा यंदक्षि

णां दत्वा फललड्डुकादि तद्धस्ते दत्वा शतं विप्रान्भोज्याः ॥ इति कमलाकरभट्टकृतः पुंसवनानवलोभ
नसीमंतोन्नयनप्रयोगः ॥ अथ जातकर्म ॥ पुत्रे जातेपि तास्यचैलं स्नात्वा देशकालौ संकीर्त्य अस्य कु
मारस्य गर्भांबुपानजदोषनाशायुर्मेधाभिवृद्धिबीजगर्भजैनोनाशद्वारा परमेश्वरप्रीत्यर्थं जातकर्म क
रिष्ये इत्युक्त्वा गणेशपूजापुण्याहवाचनमातृकापूजानांदीश्राद्धानि कृत्वा होमपक्षे व्याहृतिभिः प्र
बलसंज्ञमग्निं प्रतिष्ठाप्य ततोग्निमिदं प्रजापतिं विश्वान्देवान् ब्रह्माणं चाज्येन नाममंत्रेण हुत्वा स्वि
ष्टकृदादि कृत्वा मधुघृते हिरण्येनावघ्राय ॐ प्रते ददामि मधुनो घृतस्य वेदं सवित्रा प्रसूतं मघोना
म् आयुष्मान् गुप्तो देवताभिः शतं जीवेम शरदो लोके अस्मिन् इति तेनैव प्राशइत्वा हिरण्यं प्रक्षा
ल्य शिशोर्दक्षिणे सव्ये च कर्णे निधाय तन्मुख समीपे स्वमुखमानीय ॐ मेधां ते देवः सविता मेधां
देवी सरस्वती मेधां ते अश्विनौ देवावाधत्तां पुष्करस्रजाविति जपेत् पुनस्तद्धिरण्यं सव्ये कर्णे निधा

२५ यैनाम्ने वर्च्चे जपेत् ततः शिरसोरं सौम्युगपदभिमृश्य ॐ अश्मा भव परशुर्भव हिरण्यमस्तृतं भव वेदो वै
पुत्रनामासि स जीव शरदः शतं इंद्र श्रेष्ठानि द्रविणानि अस्मे प्रयंधि मघवन्नृजीषिन् इति मंत्रद्वयं
जपेत् ततः अंगादंगात्संभवसि हृदयादधिजायसे आत्मा वै पुत्रनामासि स जीव शरदः शतमिति मूर्ध
14 नि त्रिरवघ्राय इमं कुमारो जरां धयतु दीर्घमायुः प्रजी वसे अस्यै स्तनं प्रयुं जाना आयुर्वर्चो यशो बल
इति दक्षिणं हस्तं प्रक्षाल्य दद्यात् ततः करिष्यमाण नाम स्मरेदिति कश्चित् इति जातकर्म अथ ष
ष्ठीपूजनं ॥ पंचम्यां षष्ठ्यां वा रात्रौ पिता देशकालौ संस्मृत्या अस्य शिशोः सूतिकायाश्च सर्वारिष्ट शां राम
त्यायुरारोग्यपरिध्यर्थं जन्मदानां षष्ठ्या जीवंतिकायाः स्कंदस्य राकादीनां च पूजनमहं करिष्ये इत्युक्त्वा २५
कलशं संस्थाप्य तत्र प्रतिमासु अक्षतपुंजेषु गणेशं जन्मदाः जीवंतिकां स्कंदं राकां अनुमतिं शिनी
वाली कुहूं कुड्ये लिखितां षष्ठीं शस्त्रे भगवती च आयाहि वरदे देवि महाषष्ठीति विश्रुते ॥ शक्तिभिः

सहवालं मेरक्ष जागरवासरे ॥ शक्तिं स्त्वं सर्वदेवानां लोकानां हितकारिणी ॥ मातर्बालमिमं रक्ष महाभ
ष्ठी नमोस्तुते ॥ आभ्यां षष्ठी मावाह्य तदस्तु० गृहावे० प्रतिष्ठाप्य षोडशोपचारैः संपूज्य दधिभक्तं नि
वेद्य दीपान् मा षभक्तं बलीं दत्वा प्रार्थयेत् गौरीपुत्रो यथा स्कंदः शिशुत्वे रक्षितः पुरा तथा ममाप्ययं बा
लः षष्ठिके रक्षितां नमः विप्रान् संपूज्य खाद्य दक्षिणादि दत्वा रात्रौ जागरणं कुर्युः इति षष्ठी पूजा
अथ नामकर्म एकादशो द्वादशे एकत्रिंशत्तमे एकात्रिंधिक शततमे वा दिवसे कर्त्ता मंगल स्नातो धृता
लंकारः गृहयज्ञान् कृत्वा देशकालौ संकीर्त्य अस्य शिशोर्बीजगर्भजदोषनाशायुर्वृद्धि नामव्यवहारसि
द्धिद्वारा श्रीपरमेश्वरप्रीत्यर्थं नामकर्म करिष्ये इत्युक्त्वा गणेशपूजा पुण्याहवाचन मातृ पूजा नांदी
श्राद्धानि कृत्वा कांस्यादि पात्रे तंडुल पूर्णे हेम्ना गणेशनाम चतुर्थ्यंतं लिखित्वा अमुक देवता भक्त इति कु
लदेवता नाम ततो मास नाम० कृष्णो नंतो च्युतश्चक्री वैकुंठोथ जनार्दनः ॥ उपेंद्रो यज्ञपुरुषो वासुदेव

१५ स्तथाहरिः ॥ योगीशः पुंडरीकाक्षो मासनामान्यनुक्रमादिति ॥ चैत्रादिमार्गादिक्रमेणाश्वाद्यानक्षत्रपादा
दिवर्णवशो नरोहिणइत्यादिवा नाक्षत्रममुकनाम्नात्वममुकोसीत्युक्त्वा ततो व्यावहारिकं त्र्यक्षरं वायुग्मा
क्षरं पुंसां द्विषमाक्षरं स्त्रीणां विप्रादिवर्णक्रमेण शर्मवर्मगुप्तदासान्यतमं विलिख्य तदस्त्वित्युक्त्वा नामदेवता
भ्यो नम इति संपूज्य शिशोर्दक्षिणे कर्णे अमुकनाम्नात्वममुकोसीत्युक्त्वा नाम कृतांजलिरमुककनामा
15 यं भवतः सर्वान्ब्राह्मणानभिवादयते आयुष्मान्भवात्वममुक इति विप्राः एवं मासनाम्नाः नाक्षत्रेणना
म्नाः व्यावहारिकेण नाम्ना इत्यादिवा अं॰ दश विप्रा भोज्याः इति नामकरणं अथ नामदिने षोडशेन्यस्मि राम
न्वा शुभदिने कुलदेवतां योगशायिनं हरिं च संपूज्य मंगलगीतैः शंखे शिशुं स्वापयेत् द्वितीये एकत्रिंशे १५
ऽन्यस्मिन्वा संख्येनदी गोदुग्धं पाययेत् ततो द्वादशे षोडशे वाह्नि षष्ठ सप्तमाष्टमे वा मासि विष्णु ब्रह्मशि
व चंद्र सूर्य दिग्गीशाश्वि सरस्वती कुलदेवता गो विप्रान् संपूज्यो दङ्मुखस्य शिशोः कर्णौ वेधयेत् अ

यनिष्क्रमणान्नप्राशने ॥ तृतीये चतुर्थे षष्ठेऽष्टमे वा मासे पितादेशकालौ संकीर्त्य स्वशिशोरायुः
श्रीवृद्धिबीजगर्भजदोषनाशार्थं गणपतिपूर्वं चोक्तिवृद्ध्यर्थं निष्क्रमणं सूर्यावलोकनमुपवेशनं तथा
मातृगर्भमलप्राशनशुद्ध्यन्नाद्यब्रह्मवर्चसतेजइंद्रियायुर्वृद्ध्यर्थं चो॰ स्वरप्रीत्यर्थमन्नप्राशनं च तं
त्रेण करिष्ये इत्युक्त्वा गणेशपूजां पुण्याहवाचनं मातृपूजां नांदीश्राद्धं निष्क्रम्य कुलदेवतां संपूज्य सू
र्याग्निचंद्रधेनूनां तूर्यरवेण दर्शनं कारयित्वा स्वस्ति न आत्रेयो विश्वेदेवास्त्रिष्टुप् । शिशोरंकारोपणे वि
नियोगः स्वस्ति न इति सूक्तेनांकमारोप्याशुः शिशान सप्तत्रयोदशर्चस्याऽप्रतिरथसूक्तस्येंद्रोऽप्रतिरथ इं
द्रस्त्रिष्टुप् चतुर्थी बृहस्पतिदेवता त्रयोदश्यनुष्टुप् शिशोरायुष्याभिवृद्ध्यर्थं जपे विनियोगः आशुः
शिशान इति सूक्तं जपित्वा तच्चक्षुर्वसिष्ठः सूर्यः पुरउष्णिक्कुमारस्यादित्यावेक्षणे विनियोगः तच्चक्षुरि
ति सूर्यमीक्षयेत् ततः पीठे प्रतिमासु तंडुलपुंजेषु वा इंद्रादिलोकपालान् प्रागादिदिशः चंद्रार्कवासु

१६ देवगगनवराहभूमीः संपूज्यतमंत्रैर्नामभिर्वा चरुं तुला शिशुमध्येन सतूर्यं॰ दर्पणः कलशाः कन्या तथा
सुमनसोक्षताः दीपमाला ध्वजो लाजाः संप्रोक्तं चाष्टमंगलम् इत्येवं मंगलाष्टक पुरः सर्वार्हं नीत्वा कनिक्र
ददितिस्तु क्रांते पठेत्॰ चंद्रार्कयोर्दिगीशानां दिशां च गगनस्य च॥ निक्षेपार्थमिदं दत्तं ते त्वां रक्षंतु सर्व
16 दा॥ अप्रमत्तं प्रमत्तं वा दिवा रात्रावथापि वा॥ रक्षंतु सततं सर्वे देवाः शक्रपुरोगमाः इति ततो देवालयेबं
धुगृहे स्वगृहे वा देवं संपूज्य पंचधान्यराशिषु शिशुमुपवेश्य मध्ये वस्त्रे आशीनस्य रक्षां कुर्यात्॥
यथाविभूतिं गृहीत्वा त्र्यंबकं वशिष्ठोमरुसुं जय त्रिष्टुप्॰ ड क्षायां वि॰ ॐ हौं जूं सः जूं हौं ॐ इत्यभिमंत्र्य ते
नैव ललाटे शरीरे ऽवलिप्य वराहं पृथिवीं गुरुं देवद्विजान् संपूज्य शिशुमुपवेशयेत्॥ रक्षैनं वसुधे देवि राम
सदा सर्वगतं शुभे॥ आयुः प्रमाणं सकलं निक्षिपस्व हरिप्रिये॥ अचिरादायुषस्त्वस्य ये केचित्परि १६
पंथिनः॥ जीविता रोग्य वित्तेषु निर्दहस्वाचिरेण तान्॥ धारिण्यशेषभूतानां मातस्त्वमसि कामधुक्॥

अचरा चात्रमेया च सर्वलोकनमस्कृता ॥ चराचराणां भूतानां प्रतिष्ठा चाव्यया त्वसि ॥ कुमारं पाहि मात
रस्त्वं ब्रह्मा तदनुमन्यतामिति ॥ होमपक्षे लौकिकाग्नौ इंद्राय प्रजापतये विश्वेभ्यो देवेभ्यो ब्रह्मणे चाज्यं
नाममंत्रेण हुत्वा स्विष्टकृदादि कुर्यात् ॥ ततः इष्टदेवं संपूज्य तदग्रे दधिमधुघृतमन्नं हैमादायान्नपतेन
ल कुबेरोन्नपतिर्जगती० अन्नप्राशने विनियोगः ॐ अन्नपतेन्नस्य नो देह्यनमीवस्य शुष्मिणः प्रप्रदा
तारं तारिष ऊर्जं नो धेहि द्विपदे चतुष्पदे इति शिशुं प्राशयित्वा भोजयित्वा चम्य तांबूलं दत्वा भूमावुपवे
श्य तदग्रे पुस्तकशस्त्रावस्त्रादि शिल्यानि विन्यस्य जीविकापरीक्षां कुर्यात् ॥ शिशुः स्वेच्छया यत्प्रथमं स्पृ
शेत् सास्य जीविकेति ज्ञेयं ॥ तत आशिषो गृह्णीयात् एवं कुमार्या अपि ॥ इति कमलाकरभट्टकृतान्नप्रा
शनं अथ वर्षवर्धापनं प्रतिवर्षं जन्मदिने मंगलस्नानं कृत्वा शूर्पमध्ये हरिद्रयाकुंकुमेन वा कुमुदा
मा षष्ठी गौरी रुद्राणी पार्वती उमा० काली सरस्वती सावित्री समी संज्ञा मे धा पुष्टिः तुष्टिः नपष्टिम

नारायणी जीवंतीति षोडशोपचारैः संपूज्यैकैकस्य षोडशाष्टौ चत्वारि द्वे एकं वा वंशपात्राण्यपूपपूरिका
१७ आदिपक्वान्नफलपुष्पयुतानि दद्यादिति हेमाद्रौ॰ ग्रहयज्ञं कृत्वाऽऽयुर्वृद्ध्यर्थं स्वस्ति वाच्य प्रागुक्तं मृत्युं
जयमंत्रेण दूर्वाभिरष्टोत्तरशतं हुत्वा सिद्धान्नेन आ नो भद्रा इति दशभिरिमं स्तोममिति षोडशभिर्जातवेदसे
17 इति चरुं त्वागमोक्ते शं वासुदेवं नक्षत्रं तद्देवतां चंद्रं वरुणं गुरुं इष्टदेवं मार्कंडेयं अश्वत्थामा बलिर्व्यासो
हनूमांश्च विभीषणः॥ कृपः परशुरामश्च सप्तैते चिरजीविन इति अष्टौ वापूज्य तं कृत्वा मार्कंडेय न
मस्तेस्तु सप्तकल्पांतजीवन॥ आयुरारोग्यसिध्यर्थं प्रसीद भगवन् मुने॥ चिरंजीवी यथा त्वं तु मुनीनां प्र राम
वर द्विज॥ कुरुष्व मुनिशार्दूल तथा मां चिरजीविनमिति संप्रार्थ्य मार्कंडेय महाभाग सप्तकल्पांतजीवन॥ १७
आयुरारोग्यसिध्यर्थमस्माकं वरदो भव॥ सतिलं गुडसंमिश्रं अंजल्यर्धमितं पयः॥ मार्कंडेयाद्वरं लब्ध्वा
पिबाम्यायुर्विवृद्धये॥ इति दुग्धं पिबेत्॥ इति वर्धापनं॥ अथ सचौलोपनयनप्रयोगः॥ पिता कामया

र्कामवाद्कामभक्षादिदोषपरिहारार्थं वटुनाकृच्छ्रत्रयं कारयित्वा स्वस्वाधिकारार्थं कृच्छ्रत्रयं चकृत्वा देश
कालौ संकीर्त्य अस्य कुमारस्य बीजगर्भसमुद्भवैनोनिवर्हणद्वारा बलायुर्वर्चोभिवृद्ध्यर्थं चौलकर्म तथा
द्विजत्वसिद्ध्या वेदाध्ययनाधिकारसिद्ध्यर्थं च उपनयनं च करिष्ये तदंगतया निर्विघ्नतासिद्ध्यर्थं गणेश
पूजनं पुण्याहवाचनं मातृकापूजनं नांदीश्राद्धं देवक मंडपदेवतास्थापनं च कृत्वा ऽपरेद्युश्चौलकर्मांग
स्थंडिलादिस्थाग्निप्रतिष्ठांते प्रणीताप्रणयोत्तरं उत्तरतो व्रीहियवमाषतिलानां पूर्णशरावाणि प्राक्
संस्थान्यानडुहगोमययुतं शरावं शमीपर्णयुतशरावमेकविंशतिकुशपत्राणि क्षुरं च निधाय अन्वाधा
ने आधारांतमुक्त्वा प्रधानं त्रिरग्निं पवमानं प्रजापतिं चाज्येन शेषेण स्विष्टकृतमित्यादि आधारांते अग्न
आंयूषीति तिसृणां शतं वैखानसा अग्निः पवमानो गायत्री॰ होमे वि॰ अग्न आयूंषि॰ स्वाहा॰ अग्नये पव
मानायेदं॰ अग्निर्ऋषिः अग्नेपवस्व प्रजापते हिरण्यगर्भः प्रजा॰ स्त्रि॰ होमे॰ इति हुत्वा शिशोः पश्चिमतः स्थित्वा

१८ उष्णेन वाय उदकेनेहीति शीतोष्णा अपः एकीकृत्य तद्दर्शेन नवनीतं दधिद्रप्सं वा लोड्य मातुरङ्कगतस्य वटो
र्वाम कर्णोपरि अदितिः केशान्वपत्वाप उन्दन्तु वर्चस इति त्रिः शिरः क्लेदयित्वा एकविंशति कुशपिञ्जूलम
ध्ये त्रीणि दक्षिण कर्णोपरि पश्चिमाग्राणि ओषधे त्रायस्वैनमिति निधाय स्वधिते मैनं हिंसीः क्षुरं निधाय पाणे
18 नावपत्स्व विना क्षुरेण सोमस्य राज्ञो वरुणस्य विद्वान्॥ तेन ब्रह्माणो वपतेदमस्यायुष्मान् जरदष्टिर्यथा
सदिति प्रच्छिद्य प्रागग्रां शमीपर्णैः सह मात्रे प्रयच्छति ता नानडुहे गोमये निदधाति॥ एवं द्वितीये॰ येन धा
ता बृहस्पतेरग्नेरिन्द्रस्य चायुषेवपत्॰ तेन त आयुषे वपामि सुश्लोक्याय स्वस्तय इति छेदः॰ तृतीये॰ ये राम
न भूयश्चरात्यां ज्योक्च पश्याति सूर्यं॰ तेन त आ॰ इति छेदः॰ चतुर्थे॰ येनावपत्॰ येन धाता॰ येन भूयश्चराति १८
सर्वैश्छेदः एवमुत्तरकर्णोपरि चतुर्थं वर्जं त्रिः कृत्वा॰ यत्क्षुरेण मर्चयता सुपेशसा वप्ता वपसि केशान्॰ शुं
धि शिरो मास्यायुः प्रमोषीरिति ऊर्ध्वं क्षुरं निमृज्य शीतोष्णाभिरद्भिरवधं कुर्वाणोऽक्षण्वन्कुशलीकुर्वि

तिनापितंशिरश्चत्तवरसंरूप्यया शिखा रक्षित्वा वपेत् ततः मातुरुत्संगेऽवस्थाय स्थित्वा कदाचिद्विशेषं समापयेत् ॥८
श विप्रा भोज्याः ॥ इति चौलं ॥ अथ भोजितं वापितं स्नापितं च कुमारं शुभेक्षे लग्नेऽग्निं वाद्यपि तां कमारोप्य येय
ज्ञेन तिपंचवर्षैः यदि शाखोक्तं गृह्ये लाभ चम्पत्राणां नामयास्य कुमारस्य द्विजत्व सिद्धिद्वारा वेदाध्ययनाधिकारार्थं
मुपनहोमं करिष्ये तदंगतया स्थलोपनो ल्लेखनादि आज्यभागवर्जमन्वाधानं कृत्वाऽन्यसंस्कारं तं तेन वटोः सू
त्रं कटावाव ध्यकौपीनं परिधाप्य युवं वस्त्राणि सौचथ्यो दीर्घतमा मित्रावरुणौ त्रिष्टुप् वासो धारणे वि०
इति शुक्लं वासः परिधाप्य० मित्रस्य चक्षुर्वामदेवोऽजिनं त्रिष्टुप् अजिन धारणे वि० मित्रस्य चक्षुर्धरुणं व
लीयस्तेजो यश स्विस्थविरं समिद्धं अनाहनस्यं वसनं जरिष्णु परीदं वाज्यजिनं दधेह मिस जिनं कापायं वा वा
सः परिधाप्य यज्ञोपवीतं परमं ब्रह्मा परमात्मा त्रिष्टुप्० श्रौतस्मार्तनित्यकर्मसिध्यर्थं यज्ञो० धारणे वि
नियोगः इति यज्ञोपवीतं परिधाप्य कुमारमात्मनोऽग्नेश्चमध्येन उदङ्नीत्वा विधिवदाचम्य पुनस्ताथे

१९ वानीयदक्षिणतउपवेश्यवर्हिरास्तरणाद्याधारांते ब्रह्मचार्यन्वारब्धः अग्नआयूंषीसादि चौलवधुलाकु

मारमुदङ्नीलाकुमारस्यशुचिर्वासिध्यर्थे सूर्यप्रीत्यर्थे चांजल्यवक्षारणं करिष्येइतिसंकल्प्यतत्रांज

लिमुदकेनापूर्यस्वांजलिमन्येनपूड्यित्वातत्सवितुः श्यावाश्वः सवितानुष्टुप् ओं जल्यवक्षारणेविनियोगः

19 इतिकुमारांजल्यावक्षार्यदेवस्यत्वेत्यादि हस्तांगृह्णाम्यमुकशर्मन्निति वटोर्दक्षिणस्तांगुष्ठमुत्तानंहस्तं

गृहीत्वापुनरवक्षार्यसवितातेहस्तमग्रभीदितिहस्तंगृहीत्वापुनरवक्षार्यअग्निराचार्यस्तवामुकशर्मन्नि

तित्वतीयेहस्तंगृहीत्वाऽदित्समीक्षयेत् देवसवितरेषतेब्रह्मचारीतंगोपायसमामृतेति० ततउभावपि राम

पूर्ववदुत्तरतोग्नेरन्योन्याभिमुखौतिष्ठेतां० आचार्यः कस्यब्रह्मचार्यसि० प्राणस्यब्रह्मचार्यसि कस्त्वाकमु १९

पनयतेकायत्वापरिददामीतिप्रजापतयेवटुं समर्प्य युवासुवासा इतिकौशिकोविश्वामित्रोयूपस्त्रिष्टुप्पू

र्वार्धर्चस्यप्रदक्षिणावर्त्तनेउत्तरार्धर्चस्यपाणिभ्यांवटुहृदयालंभनेवि० युवासुवासाइत्यनेनवटुंप्रदक्षि

णमावर्सतं धीरास इति कुमार्यां सयोरुपरि स्वपाणी गमयित्वा पाणिभ्यां तस्य दर्भं स्पृष्ट्वा दक्षिणेन गत्वाग्नेः प
रिसमूहनपर्युक्षणे कृत्वा व्यस्तिकारमते ऽ कृत्वा अग्नये समिधं हिरण्यगर्भोऽग्निस्त्रि॰ समिदाधाने विनियोगः
इति समिधमाधायाग्नय इदं तेजसा समनज्मीति पाणिं प्रक्षाल्याग्निं स्पृष्ट्वा श्रोत्रे श्रोत्रिर्मुखं निमृज्य पाणिं
प्रक्षाल्य मयि मेधामिति षण्णां हिरण्यगर्भ ऋषिः पूर्वेषां त्रयाणां मग्नीन्द्रसूर्या देवताः उत्तरत्रयाणां मग्नि
र्देवता॰ गायत्री छं॰ अग्न्युपस्थाने वि॰ इत्युपस्थायमानस्तो कुत्सो रुद्रो जगती इति विभूतिं धृत्वा त्र्यायुषं ज
मदग्नेरिति ललाटे॰ कश्यपस्य॰ कण्ठे॰ अगस्त्यस्य॰ नाभौ॰ यद्देवानामिति दक्षिणांसे॰ तन्मे अस्तु वामांसे शता
युषमिति शिरसि ततः परिसमूहनपर्युक्षणे कृत्वा ॐ चम इत्युपस्थाय कर्णौ धृत्वामुकप्रवरान्वितामुकगो
त्रो ऽमुकशर्माहं अभिवादये इत्यग्निमुपस्थायाग्नेरुत्तरतः प्रसङ्मुखो दक्षिणं जानु भूतले निधाय पाणि
भ्यां सव्यदक्षिणश्रोत्रे संस्पृश्य हस्तपाणिराचार्यस्य दक्षिणं पादं स्वदक्षिणहस्तेन सव्यं च सव्यहस्तेन जानु

२० ग्रन्थिपादपर्यन्तं स्पृष्ट्वाऽमुकगोत्रोऽमुकशर्माहं भो अभिवादय इति शरीरानतिपूर्वमभिवाद्याचार्येणायुष्मा
न्भव सौम्य देवदत्ता इति प्रयुक्ताशीर्वादः अधीहि भोः सावित्रीं भो अनुब्रूहीति वदेत्॰ ततो वामपाणिमुत्ता
नं कृत्वा तदुपरि दक्षिणं पाणिं निधाय पाणी पृष्ठमङ्गुलीभ्यामङ्गुष्ठौ च दृढौ कृत्वा बद्धाञ्जलिं कुर्यात् ततो भोजनपा
20 त्रे तण्डुलपूर्णे गायत्रीं लिखित्वाऽर्चयेदित्याचारः अथाचार्यस्तदञ्जलिं तस्योपरि हितेन वाससाऽऽच्छाद्य स्वपाणि
भ्यां तदञ्जलिं परिगृह्य प्रणवस्य॰ परब्रह्म ऋषिः परमात्मा देवता दैवी गायत्री छन्दः व्याहृतीनां परमेष्ठी प्रजा
पतिऋषिः प्रजापतिर्देवता॰ बृहती छन्दः गायत्र्या विश्वामित्र ऋषिः सविता देवता गायत्री छन्दः॰ उपदेशे वि॰
पच्छोऽर्धर्चशः सर्वां गायत्रीं स्वयमुक्त्वा तथैव वाचयित्वा मम व्रते प्रजापतिर्बृहस्पतिस्त्रिष्टुप्॰ वटोर्हृदये ऊ राम
र्ध्वाङ्गुलिं पाणिं निधाने वि॰ मम व्रते हृदयं॰ नियुनक्तु मह्यमिति वटुहृदये ऊर्ध्वाङ्गुलिं पाणिं निधाय॰ इयं दु २०
रुक्तादिति द्वयोर्वामदेवो मेखला त्रि॰ परीयं दुरुक्तात्परिबाधमाना शर्म॰ तृ॰ प्राणा॰ ल्लेयं॰ ऋतस्य गोप्त्री॰ रा

तीः॰ सा नः स॰ रे हिं॰ मारिषा मेतिमे खलामाबध्यनाभिदेशे ग्रंथित्रयं बध्वा वटुः सरहस्यांगसहितवेदत्रयेणाव्तो
दृमितिमन्येत ततः स्वस्ति नः स्वस्त्यागौ त्रेयो विश्वेदेवा अनुष्टुप्॰ इति दंडं प्रदाय॥ अदांतं दमयित्वा मां मार्गे
संस्थापयन् स्वयं॰ दंडः करे स्थितो यस्मात् तस्माद्रक्षयतो भयमिति गृहीते ब्रह्मचर्यमादिशेत्॰ ब्रह्मचार्यसि॰
अपोशान॰ कर्म कुरु॰ दिवा मा स्वाप्सीः॰ आचार्याधीनो वेदमधीष्व॰ सायं प्रातर्भिक्षेथाः॰ सायं प्रातः समिध
माधेहि वेदग्रहणांतं ब्रह्मचर्यं चर॰ ततः स्विष्टकृदादिशेषं समाप्याग्निरक्षेतनीराजनवस्त्रधारणादीनि कृ
त्वा वटुर्भवत्सूर्वी भिक्षां मातरं याचेत भवती भिक्षां ददात्विति॰ भिक्षांतं दुग्धान्नि धायसायं संध्याग्निकार्यं कृत्वा
आचार्यो देशकालौ स्मृत्वोपनयनांगभूतमनुप्रवचनीयहोमं करिष्ये तदंगान्वाधाने आघारांते सदसस्पतिं
सवितारं ऋषीश्चरुद्रव्येण शेषेण स्विष्टकृतमित्यादि देवताध्येये तूष्णीं तृतीयेमंत्रेण निर्वापादि चरुं कृत्वाश्रे
तः स्थाली पाक इति वटुनोक्ते चरोरुदगुद्वासनादि आघारांतं॰ नान्वेत्रे क्षुधी॰ सो विष्टकृतं चतुर्थमिति सूत्रा

२१ त्॰ तास्तु चरुमवदाय सदसस्पतिमित्यस्य काण्वो मेधातिथिः सदसस्पतिर्गा य॰ अनुप्रवचनीयप्रधानचरु
21
होमे विनि॰ ॐ सदसस्पतिमस दसस्य तये इदमिति प्रथमं हुत्वा पुनरवदाय सावित्र्या द्वितीयं हुत्वा सवित्र इ
दं॰ पुनरवदाय ऋषिभ्यः स्वाहेति तृतीयं हुत्वा स्विष्टकृदादिशेषं समाप्य हविः शेषेण विप्रान् संभोज्य त्रि
वेदसमाप्तिं वा वाचयित्वा दक्षिणां दद्यात्॥ अथाचार्यश्चतुर्थेह्नि देशकालौ स्मृत्वा बटोरुपनयनव्रतसमाप्ति
वेदग्रहणसामर्थ्यलक्षणमेधाभिवृद्ध्यर्थं मेधाजननं करिष्ये इति संकल्प्य गणेशं संपूज्य शौनकमते पु
ण्याहवाचनं कृत्वा मेधाजननकर्मणि पूर्वोक्तफलसिद्ध्यर्थं मेधापरनामकसावित्रीपूजां करिष्ये पला
शवृक्षे दर्भस्तंबे वा गायत्र्या मेधायै नम इति मेधापरनामकसावित्रीं षोडशोपचारैः संपूज्य यावकसक्तुमो राम
दकमिश्रमन्नं निवेद्य पुनस्तथैव संपूज्य बटुजलधारां सिंचंतं त्रिर्वाचयेत् प्रणमेच्च॰ ॐ सुश्रवः सुश्रवाय २१
था त्वं सुश्रवः सुश्रवा अस्येवं मां सुश्रवः सौश्रवसं कुरु॰ यथा त्वं देवानां यज्ञस्य निधिपोऽस्येवमहं मनुष्याणां

वेदस्वनिधिर्यो भूयासं ततो वटुः स्नात्वामेखलाजिनोपवीतदंडान् नवान् पूर्वोक्तमंत्रैर्धारयित्वाजीर्णानिवि
सृजेत्॥ वाचनानि दद्यात्॰ ततो मेधामह्यमिति सूक्तं विप्रैः पाठयेत्॥ मेधामह्यमंगिरसो मेधां सप्तर्षयो दधुः
मेधामिंद्रश्चाग्निश्च मेधां धाता ददातु मे मेधां मे वरुणो राजा मेधां देवी सरस्वती मेधां मे अश्विनौ देवावा
धत्तां पुष्करस्रजा॥ या मेधा अप्सरस्सु गंधर्वेषु च यन्मनः दैवी या मानुषी मेधा सा मामा विशतादुमां॥ यन्मे
नोक्तं प्रद्भमतां शाकेयं यदनुभुवे॥ निशामतं निशामयेमयि श्रुतं सह व्रतेन भूयासं ब्रह्मणा संनमेमहि॥ शरीरं
मे विचक्षणं वाङ् मे मधुहा अन्वक्षमहमसौ सूर्यो ब्रह्मण आणी स्थः श्रुतं मे मा प्रहासीः मेधां देवीं मनसा रेज
मानां गंधर्वजुष्टां प्रति नो जुषस्व॥ मह्यं मेधां वद मह्यं श्रियं वद मेधावी भूयासमजराजरिष्णुः॥ सदसस्पतिम
द्भु॰म्य सिषं॰ यां मेधां देवगणाः पितरश्चोपासते॥ तया मामद्य मेधयाग्ने मेधाविनं कुरु॥ मेधाव्यहं सुमानाः
सुप्रतीकः श्रद्धामनाः सत्यमतिः सुशेवः। महायशा धारयिष्णुः प्रजया भूयासमर्पैस्वधयाप्रयोगे॥ ततो

२२ विवाहवद्देवकोत्थापनं इति जगद्गुरु नारायण भट्ट सूनुराम कृष्ण भट्टात्मज कमलाकर भट्ट कृतः सचौलो
पनयनप्रयोगः अथमहानाम्न्यादिव्रतानि जन्मतः षोडशेऽब्दे उत्तरायणे आचार्यो देशकालौ स्मृत्वाब्रह्म
चारिणः महानाम्नीव्रतसिद्धिद्वारापरमेश्वरप्रीत्यर्थं होमं करिष्ये तदंगं गणेशपूजापुण्याहवाचनमातृपू
22 जानांदीश्राद्धानि कृत्वाबटोर्वपनस्थाने कृत्वाऽग्निं प्रतिष्ठाप्यास्मिन् होमे देवतापरिग्रहार्थं इत्यादि च
क्षुषी वर्जमाज्यभागांते त्रिरग्निं पवमानं प्रजापतिं चाज्येन शेषेण स्विष्टकृतमित्याज्यसंस्कारांते वटोः सूत्रं
कर्पासं वा बध्वाकौपीनं परिधाप्य युवं वस्त्राणीति वासः परिधाप्यान्यमंत्रात् वस्त्राप्रावृत्य यज्ञोपवीतं मंत्रे राम
णधृत्वोत्तरे बटुमाचम्य दक्षिणे उपविश्याघारांतेऽग्न आयूंषीतीतिसृभिः प्रजापते न त्वदित्याज्येनहु २२
त्वोपनयनवत्तत्सवितुर्वरणीमहइत्यस्य वक्षारणं कृत्वा देवस्य त्वेति संवुध्यं तेहस्तं गृहीत्वा पुनः कृत्वास
वितातेहस्तमग्रभीदिति गृहीत्वा पुनः कृत्वाग्निराचार्यस्तवेति गृहीत्वा देवसवितः एषसादित्येक्षणं कृ

स्वब्रह्मचार्यसीति बटुं कायत्वा॰ सुवासुवासा इति हृदयमालभ्याग्निकार्यं कृत्वा मेखलां दंडं च दत्वा जीर्णा
नि सत्का॰ स्विष्टकृदादि शेषं समाप्य महानाम्नीव्रतं चरेति गुरुणा ते बटु श्चरिष्यामी त्युक्त्वा॰ऽदं भिक्षाकेश
धारणा घेव्रतं चीर्त्वा ते ग्रामाद्बहिर्गुरुरस्य महानाम्नीव्रतसंपूर्त्यर्थं होमं करिष्ये इत्या घग्निं प्रतिष्ठाप्य
चक्षुष्यं ते ऽग्रप्र्याणं अग्निं संराधनी मग्निमस्तु यन्ती मनुमतिं प्रदातारमिंद्रमग्निं वायुं सूर्यं चन्द्र सरा न्ने
न शेषेण स्विष्टकृतमित्यादि नवभ्यः वटोर्भोजनाय च तंडुलान्नि रूप्य तिलान्नुक्षित्वा भ्यतः स्थाली पाक
इति बटुनो क्ते चक्षुष्यं ते ऽवदाय॰ अग्ना वग्निश्चरति प्रविष्ट ऋषीणां पुत्रो ऽधिराजएषः तस्मै जुहोमि हवि
षा घृतेन मा देवानामो मुहू झागधेयं मोऽस्माकं मो मुहू झागधेयं स्वाहा॰ अग्नय इदं॰ यातिरश्ची निपद्य
ते अहं विधरणी इति तां त्वा घृतस्य धारया यजे संराधनी महं स्वाहा संराधन्या इदं॰ यस्मै त्वा कामका
माय वयं सम्राड्यजामहे॰ तमस्मभ्यं कामं दत्वाथेदं त्वं घृतं पिब स्वाहा॰ अमनय इदं॰ अयं वो अग्निर्वरिवः

२३ रुणोलयंमुचः पुरएतु प्रतिदन्न् अयं शत्रून् जयतु जर्हृषाणो यं वाजं जयतु वाजसातौ स्वाहा॰ अग्नय
इदं॰ अग्नयं सोमानु मसे चस्वाहा॰ अग्नयं से अनुमत्याइदं॰ प्रदात्रे स्वाहा॰ प्रदात्रे द्वायेदं॰ भूर्भुवः स्वः
प्रसेकमग्न्यादिभ्यो हुत्वा स्रुचि स्विष्टकृते ऽवदाय बर्हिषि निधाय एतस्यालीपाकं सर्वमशानेति प्रेषि
23 तो बटुः सर्वं प्राश्याचम्याऽग्निं व्रतपूर्तये उपतिष्ठस्वेति प्रेषितो बटुः त्वं व्रतानां व्रतपतिरसि व्रतं च
रिष्यामि तच्छकेयं तेन शकेयं तेन राध्यासमित्यग्निं जलपूर्णाञ्जलिं दत्त्वोपतिष्ठेत गुरुरप्येवं कारयि
त्वाऽक्षिमीलनं वाग्यमं च कारयित्वा त्रयस्त्रिंशद्देवता वेदत्रयं च स्मरन् बटोः सुखं सशिरः कर्णमहतेन राम
वाससा वामकर्णमारभ्य त्रिरावेष्ट्य करात्रं त्रिरात्रं चैवं भूतो स्वपन् भवेति प्रेष्य स्विष्टकृदादि शेषं समा २३
प्योत्तरकाले ऽग्नेरुत्तरतोसि मुद्रक मण्डलुमश्मानं च निधाय रक्तांशुके नांवावत्सतरी वध्वाऽग्निं प्रतिष्ठा
प्य पश्चिमे तरणे घे शानी सुखो गुरुर्नैर्ऋती मुखो बटुः एष्वेसं धाम महानाम्नी भोऽस्मि नु ग्रूहीति बटुना प्र

ष्ठितो गुरुर्दक्षिणीं संमील्य विदामघवन्विदे स्यादित वक्रं तव: एवाह्येवेवाहलग्नाद्रसादिन वबा क्यानि च
निर्ब्रूयात्॰ वटुस्त्रिर्वदेत्॰ ततस्तस्य मुखवेक्षणं गुरुः क्रादि समीक्षस्वेति उक्तो वटुर्मित्रस्यत्वा चक्षुषा प्रती
क्षे॰ मित्रस्यत्वा चक्षुषा समीक्षे इत्याभ्यामीक्षेत॰ मित्रस्य चक्षुक्षपानु वीक्ष इति द्विशो वीक्ष्य गुरुरादिस
मीक्षस्वेत्युक्तो मित्रस्यत्वा चक्षुषा प्रति पश्यामि॰ योस्मान्द्वेष्टि यं च वयं द्विष्मस्तं चक्षोर्हेतिर्ऋच्छत्विति स
र्वमीक्षेत॰ अग्न इत्वा नम इत्वा नम ऋषिभ्यो मंत्रकृद्भ्यो मंत्रपतिभ्यो नमो वोस्तु देवेभ्यो शिवा नः शं
तमा भव सुमृडीका सरस्वति मा ते व्योम संदृशि॰ भद्रं कर्णेभिः॰ शन्न इन्द्राग्नी॰ स्तुषे जनं सुव्रतं॰ कया
नश्चित्र॰ स्योनेति च भूमिं स्पृष्ट्वा वत्सतरीं गुरवे दत्वा तं दृष्ट्वा नृ शिक्षां याचितमिलामहानाम्न्यध्ययनांगभू
तमनुप्रवचनीयहोमं करिष्ये इत्युक्त्वोपनयनवदग्निस्थापनाद्याघारांते चक्षुषी वर्जं सदसस्पतिं प्र
थमां महानाम्नीभ्यः स्वाहेति द्वितीयां ऋषिभ्यः स्वाहेति तृतीयां हुत्वा शेषं समाप्य त्रीन्विप्रान्संभोज्य

२५ वेदसमाप्तिं वाचयीत इति कमलाकरकृतो महानाम्नीप्रयोगः अथ महाव्रते आचार्यः प्राग्वत्सोऽशैमे

षसमाप्तं ते संवत्सरं महाव्रतं चरेति प्रेष्य ग्रामाद्बहिर्महाव्रतं भो अनुब्रूहीति प्रैषांते ऽथ महाव्रतमित्यारण्य

२४ कमुपदिश्य भूमिस्पर्शाद्यनुप्रवचनीयहोमे महाव्रताय स्वाहेति द्वितीयाहुतिः शेषं प्राग्वत्. उपनिष

द्व्रते तु व्रतांते उपनिषदं भो अनुब्रूहीति प्रैषांते ऽथातः संहिताया उपनिषदित्यारण्यकं त्रिर्वाचयेत् उप

निषदे स्वाहेति द्वितीयाहुतिः शेषं प्राग्वत्. अथ गोदानं षोडशेऽब्दे गुरुर्देशकालौ संकीर्त्य अस्य बीजग

र्भजैनोनाशार्थं गोदानं करिष्ये तदंगतया गणेशपूजा पु० नमाम० नांदीश्रा० स्था० ला० अग्निस्थापनाद्याघा राम

रांते त्रिरग्नये पवमानाय प्रजापतये चरुलाउप्तो नवा यवुद्दके ने हीति शीतोष्णाजले कृदेशं नवनीतेन द २५

ध्ना वा संयोज्य आदितिः श्मश्रूणि वपतापउंदंतु वर्चसे इति त्रिर्मे त्राव्यसा वामतः श्मश्रूणि क्लेदयित्वा

दक्षिणे पक्षे ॐ षधे त्रायस्वैनमिति त्रीणि कुशपत्राणि पश्चिमाग्राणि निधाय स्वधिते मैनं हिंसीरि

ति क्षुरं निधायये नावपदिति छित्वाशमी पर्णैः सह माते दत्वाऽनुडुहे गोमये निदध्यात् एवं येन धातेति द्वि
तीयं येन भूयश्चेति तृतीयं त्रिभिर्मंत्रैश्चतुर्थं एवं वामे त्रीणि छित्वा॰ यत्क्षुरेण॰ वपासि स्मश्रूणि। शुंधि
शिरो मुखं मा स्यायुः प्रमोषीरिति॰ शीतोष्णाभिरद्भिरवथैं कुर्वाणो क्षण्वन् कुशली कुरु॰ कुर्विति प्रेषं द
त्वापवनांते होमशेषं समाप्य मौनी वटुः सायं गुरवे गो वृषौ वरं दत्वा संवत्सरं गोदानं व्रतं चरेति प्रेषितः
केशश्मश्रु धत्वा न चरेत् इति गोदानं अथोपाकर्मोत्सर्जनप्रयोगः दैवाकालौ स्मृत्वा मम एतेषां ब्रा
ह्मणानां चाधीतानां छंद आदीनां यातयामतानिरासेनाप्यायनद्वारा श्रीपरमेश्वरप्रीत्यर्थं मंतरितमु
त्सर्जनाख्यं कर्म उपाकर्मदिने करिष्ये तदंगत्वात् स्थंडिले लोपलोखनादि करिष्ये इसं तमुल्लासमिद्धय
मादयच क्षुषी आज्येन संते॰ सावित्रीं ब्रह्माणं २ श्रद्धां ३ मेधां ४ प्रज्ञां ५ धारणां ६ सदसस्पतिं ७ अनुमतिं
८ अग्निं ५ मित्रावरुणौ ६ अग्निं ७ अपः ८ अग्निं मरुतः १० अग्निं ११ विश्वान् देवान् १२ अग्निं १३ इंद्रासो

मौ १४ इंद्रं १५ अग्ना मरुतः १६ पवमानसोमं १७ सोमं १८ अग्निं १९ संज्ञानं २० एताः प्रधानदेवताः गृह्यसि
द्धान्नेन शेषेणस्विष्टकृतमित्यादि आज्याधिश्रयणांते च मग्नावधिश्रित्याभिधार्य उदगुद्वास्य बर्हिष्यासा
द्य चक्षुष्यं ते सावित्र्यै स्वाहा सावित्र्यै इदं सज्जामि न मम • एवं सर्वत्र • ब्रह्मणे • श्रद्धायै • मेधायै • प्रज्ञायै •

धारणायै • सदसस्पतये • अनुमतये • छंदोभ्य ऋषिभ्यः स्वाहेति हुत्वा • अप्यजामदग्न्यो जामदग्न्यमा
मंत्र्य पंचावत्तं कुर्वीत आपस्तंबस्त्वाषाढो के राचारा त प्रसूतो भक्षमकरं चरावपीति पंचावत्तिनाएक
मवदानं गृह्यतामिति प्रार्थितः स्रुच्यवदान धर्मेण पंचावदाय • अग्निमीळे मधुच्छंदा अग्निर्गायत्री •
उत्सर्जने प्रधान गृह्यसिद्धान्न होमे विनियोगः अग्नय इदं न मम • कुमुंभक स्तगस्त्यो ब्रह्मणस्पतिस्त्रिष्टुप्
उत्सर्जने • ब्रह्मण स्पतये इदं त्वमग्ने गृत्समदोऽग्निर्जगती • उत्स • अग्नय इदं • आ वदन् गृत्समदः शा
कुंतो जगती • शाकुंतायेदं • सोमस्य मा गाथिनो विश्वामित्रोऽग्निस्त्रिष्टुप् अग्नय इदं • गणानां जमदग्नि

मित्रावरुणौ गायत्री॰ मित्रावरुणाभ्यामिदं॰ त्वां ह्यग्ने वामदेवोऽग्निस्त्रिष्टु॰ अग्नय इदं॰ धामं ते वामदेव आ
पो जगती अद्भ्य इदं॰ अबोध्यग्नि बुधगविष्ठिरावग्निस्त्रिष्टुप्॰ अग्नय इदं॰ गंतानः एवयामरुन्मरुतोऽतिज
गती॰ मरुद्भ्य इदं॰ त्वं ह्यग्ने भरद्वाजोऽग्निस्त्रिष्टुप्॰ अग्नय इदं॰ यो नस्वः पायुर्भरद्वाजो विश्वेदेवाऽनु॰
विश्वेभ्यो देवेभ्य इदं॰ अग्निं नरो वशिष्ठोऽग्निर्विराट् अग्नय इदं प्रति चक्ष्व वशिष्ठ इंद्रासोमावनुष्टुप्॰
इंद्रासोमाभ्यामिदं॰ मा चिकाण्व प्रगाथ इंद्रो बृहती इंद्रायेदं॰ आग्ने याहि सोभरिरग्नामरुतोऽनुष्टुप्
अग्नामरुभ्य इदं॰ स्वादिष्ठया मधुच्छंदाः पवमानसोमो गायत्री॰ पवमानसोमायेदं॰ यत्ते राजन् कश्यपः
सोमः पंक्तिः॰ सोमायेदं॰ अग्ने ष्टहन्ना ह्यस्त्रितोऽग्निस्त्रिष्टुप् अग्नय इदं॰ समानी वः संवननः संज्ञान
मनुष्टुप्॰ संज्ञानायेदं॰ अग्निमीले कुशुंभक त्वमग्ने व्यावदं स्तथा॰ सोमस्य मा गृणा नाव त्वां ह्यग्ने
सदमिसप्त॰ धामं ते वो धिगं तानस्त्वं ह्यमे प्रथमस्तथा॰ यो नः स्वो ग्निं नरश्चैव प्रति चक्ष्व तथैव च॰ मा

२६

चित्तथाग्नेयाही तितत: स्वादिष्ठयेति वा॥ यत्तेयेष्ठ समानी वो मंत्रस्य मउदाहृतइति ततः स्विष्टकृतइत्या

दिन्नायश्चित्तहोमांते प्रणवस्य॰ परब्रह्मऋषिः परमात्मादेवता देवी गायत्री छंदः व्याहृतीनां परमे

ष्ठी प्रजापति ऋषिः अग्निवायुसूर्य प्रजापतयो देवताः देवी गायत्री देव्युष्णिक् दैव्यनुष्टुप् देवीबृह

26 त्यश्छंदांसि गायत्र्या विश्वामित्र ऋषिः सविता देवता॰ गायत्री॰ अग्नमीलइत्यादीनां छंदसां मधुछंद

आद्य ऋषयः अग्न्यादयो देवता गायत्र्यादीनि छंदांसि सर्वेषामुत्सर्जने विनियोगः मछोर्धर्चशः

सर्वा गायत्रीमुक्त्वा अग्निमीलइति वर्गद्वयमुक्त्वा अग्निर्वै देवानां॰ अथ महा॰ एष पंथाः॰ अथातः

संविदामघवन्॰ महाव्रतस्य पं॰ इषे त्वोर्जे त्वा॰ अग्न आयाहि॰ शन्नोदेवीः॰ म यरसत॰ अथैत राम

स्य स॰ पंचसंवत्सरमयं॰ समाम्नायः॰ गौः ग्माः॰ अथ शिक्षां प्रवक्ष्यामि॰ वृद्धिरादैच्॰ योगीश्व २६

रं याज्ञवल्क्यं॰ नारायणं न॰ अथातो धर्मव्याख्या॰ अथातो धर्मजि॰ तच्छंयोरावृणीमहे॰ नमो ब्रह्म

णे॰ करोमि॰ इत्युक्त्वा उत्सृष्टा नैवेद्याः ततो होमं समाप्य नद्यागत्वा उत्सर्जनांगत्वेन मलस्नानं करिष्ये
उत्सर्जनांगत्वेन भस्मस्नानं क॰ ईशानाय नम इति शिरसि॰ तत्पुरुषाय नमः मुखे॰ अघोराय नमः हृ
दये वामदेवाय नमः गुह्ये सद्योजाताय नमः पादयोः अग्निरिति भस्म जलमिति भस्म स्थलं॰ मि॰ व्यो
मेति॰ सर्वं ह वा इदं भस्मेति भस्मना स्नात्वा॰ उत्सर्जनांगत्वेन गो॰ स्नानं करिष्ये॰ गंधद्वारां दुरा॰ अग्रमग्रं
चरंतीनामोषधीनां वने २ तासामृषभपत्नीनां पवित्रं कायशोधनं। तन्मे रोगांश्च शोकांश्च नुद गोमय
सर्वदेति गोमयेन स्नात्वा॥ उत्सर्जनांगत्वेन मृत्तिका॰ नं करिष्ये॰ बलिसेति भूमिं प्रार्थ्य मा वो रिषदिति
खनित्वा। स्योनं पृथि॰ वी सादाय॰ आयनेत इति दूर्वां निधाय॰ गायत्र्याभ्युक्ष्य॰ त्रातारमिति पूर्वतः स
मायमधु॰ दक्षिणे॰ त्वा यामीति पश्चिमतः वयं सोमेत्युत्तरतः तत्स्तूर्ममित्युपरिष्टात् अधः पश्येस
ध॰ सहस्रशीर्षेति शिरसि॰ अक्षीभ्यां त इति मुखे॰ ग्रीवाभ्यस्त इति ग्रीवायां॰ अंत्राभ्यस्त इति हृदये॰

२७ नाभा नाभिन्नः नाभौ॰ त्वमिंद्र सजोषसं॰ बाह्वोः॰ सोमानं स्वरणं कक्षयोः॰ यः कुक्षिः सोमपातमः कुक्ष्योः॰
वक्षा नां पिता॰ पृष्ठे॰ ऊरुभ्यां ते॰ ऊर्वोः॰ मेहनात् मेढ्रे॰ एतावानस्य महिमा॰ पादयोः॰ यस्य विश्वानि ह
स्तयोः॰ अंगादंगात्॰ सहस्रशीर्षेति सर्वांगानि॰ अभ्यक्तां ते इति शिरसि सदूर्वां मृदं निधाय॰ हिरण्यशृं
27 गं॰ यन्मे मनसा॰ नमोग्नये॰ असाशनात्॰ सोहमपापो॰ गंगा गंगेति प्रार्थ्य त्रिः स्नात्वा आपो हिष्ठा॰ स
मुद्रज्येष्ठा॰ तरत्स मंदी॰ त्रिभिद्रुं देवेमार्जयित्वा इमं मे इति जलमालोड्य ऋतं चेति अघमर्षणं कृत्वा
ब्रह्मादयो देवा इति तर्पणं कृत्वा सह स्तोमा इति॰ कश्यपो त्रिर्भरद्वाजो विश्वामित्रो यगौतमः॥ जम राम
दग्नि वशिष्ठश्च सप्तैते ऋषयः स्मृता इति अरुंधती सहितान् सप्त ऋषीन् पीठे कुशमयान् संपू २७
ज्य॰ सावित्रीं तर्पयामि स्वाहा॰ अग्निं तर्पयामीति पूर्वोक्त देवतानां तर्पणं कृत्वा अग्निस्तृप्यतु इत्या
दि मंडल देवता तर्पणं ब्रह्मयज्ञ तर्पणं स्वपितृ तर्पणं च कृत्वा॰ यमं तं॰ धर्मराजं॰ मृत्युं॰ अंतकं॰ वैव

स्वतं॰ कालं॰ सर्वभूतक्षयं॰ औदुंबरं॰ दध्नं॰ नीलं॰ परमेष्ठिनं॰ वृकोदरं॰ चित्रं॰ चित्रगुप्तं॰ इति तर्पयित्वा॰
यमो निहंता पितृधर्मराजो वैवस्वतो दंडधरश्च कालः। भूताधिपो दत्तकृतानुसारी कृतांत एतद्दशभिर्जपंति
॰ दशवारं पठंति॰ ततः शांतिसूक्तानि॰ ऋक्षयो वै सरस्वत्यामिति च पठंति ततो विप्रभोजनं अथोपाकर्म दे
शकालौ स्मृत्वा मम एतेषां ब्राह्मणानां चाधीतानाम ध्येष्यमाणानां च छंदसां आदीनां यातयामतानिरासे
नाप्यायन द्वारा श्रीपरमेश्वरप्रीत्यर्थं उपाकर्माख्यं कर्म करिष्ये इत्युक्त्वा ततन ब्रह्मचारिणां तु गणेश
पूजा पुण्याहवाचन मातृकापूजा नांदीश्राद्धानि कृत्वाऽग्निं प्रतिष्ठाप्य समिद्धयमादाय चक्षुष्यंतेसा
वि: त्रीं ब्रह्माणमित्यादि छंदांस्यधीनात्येनेसं ते अग्निमरुणसूर्यामित्यादीन् दधिसक्तु द्रव्येण शेषेण
स्विष्टकृतं यज्ञोपवीते न परमात्मानं अपास मग्निमित्यादि चक्षुष्यंते सावित्र्यादि नवभ्यो हुत्वाऽग्नि
मीळ इत्यादि मंडलदेवताभ्यो हुत्वा स्विष्टकृदंते यज्ञोपवीतमवदाय यज्ञोपवीतमिति परब्रह्मपरमात्मा

देवतास्त्रिष्टुप्छंदः यज्ञोपवीतहोः यज्ञोपवीतं॰ परमात्मनइदंततः दधिक्राव्णो वामदेवोदधिक्रावानुष्टु
२८ प्॰ दधिसक्तु प्राशनेवि॰ दधिक्रा॰ ततोमार्जयित्वाविप्रेभ्यो यज्ञोपवीतानि दत्वास्वयंधारयित्वापूर्ववद्दे
दारंभणं कृत्वा ॐ उपाकृतावैवेदाइत्युक्त्वाजलंस्पृशेत् ततऋयाश्चेत्यादिनवाहुती हुत्वा शेषंसमापये
त् २८ इत्युपाकर्म बटुः ब्रह्मचर्यव्रतलोपजपापनिरासार्थंकृच्छ्रत्रयंकृत्वाऽग्निंप्रतिष्ठाप्यव्यस्तसमस्ता
28 दिभिराज्यंहुत्वा ॐ भूरग्नयेचपृथिव्यैचमहतेचस्वाहा भुवोवायवेचांतरिक्षायचमहतेस्वाहा॰ स्वरा
दित्यायचदिवेचमहतेचस्वाहा भूर्भुवःस्वश्चंद्रमसेचनक्षत्रेभ्यश्चदिग्भ्यश्चमहतेचस्वाहा पाहिनो
अग्नएनसेस्वाहा पाहिनोअग्नेविश्ववेदसेस्वाहा यज्ञंपाहिविभावसोस्वाहा॰ सर्वंपाहिशतक्रतोस्वाहा॰ २८
पुनरूर्जानिवर्तस्वपुनरग्नइषायुषा॥ पुनर्नःपाह्यंहसेस्वाहा सहरय्यानिवर्तस्वाग्नेपिन्वस्वधारया॥
विश्वप्स्नियाविश्वतस्परिस्वाहा॰ पुनर्मामैत्विन्द्रियमित्यादिहुत्वास्विष्टकृदादि॰ महानाम्न्यादिलोपेत्रीन्कृच्छ्रा

दशवा कृत्वा न कुर्यात् अथ समावर्तनं वटुः व्रतचतुष्टयलोपनिमित्तं कृच्छ्रचतुष्कं पूर्ववद्धोमं च कृत्वा
गुर्वाज्ञां गुरुमर्थेन च संतोष्यानुज्ञातो लोमण्यादीन्येकादशालाभे गुरवे च संपाद्य देशकालौ संकीर्त्य मम गृ
हस्थाश्रमांतरप्राप्त्यर्थं समावर्तनं करिष्ये इत्युक्त्वा स्वस्तिवाचनमातृकापूजानांदीश्राद्धानि कृत्वा
सपत्नां यज्ञियसमिधमुपरि निधायाग्निं प्रतिष्ठाप्याघारांते चक्षुषी वर्जं त्रिरग्निं पवमानं प्रजापतिं वा
य्वेनाग्निमूर्ध्वं समिधा विश्वान् देवान् दशास्त समिद्भिः शेषेण स्विष्टकृतमिसाघारांते अग्न आयूंषी
ति तिसृभिः अग्नये इदं प्रजापतये इति प्रजापतये चाज्यं चौलवत् क्षुरात्रस्त्रा उष्णेन वायवुदकेनेहि
सादितिः अदितिः श्मश्रूणि वपत्विति सादिश्मश्रूण्येव गोदानवत् •ॐ यथेत्राय स्वमां• स्वधिते माहिं
सीः० येनावपत्० वपतेदेमम आयुष्मान् जं० येन धाता० तेन म आयुषी वपामी सूक्तेन० दक्षिणे चतु
र्वारं० वामे त्रिः वापयित्वा मात्रेदघात्० यत्क्षुरेण० वपसि श्मश्रूणि० शुंधि शिरो मुखं माम आयुः प्रमो

षीः शीतोष्णिम्निरिसादिकेशश्मश्रूणिवापयित्वा करंजपिष्टेनोद्वर्त्य स्नात्वा युवं वस्त्राणीति वासोद्वयं धृत्वा
२९ दिराचम्याश्मनस्तेजोसि चक्षुर्मे पाहीति आंजनं सव्यदक्षिणे नेत्रे अश्मनस्तेजोसि श्रोत्रं मे पाही
ति श्रोत्रयोः कुंडले दत्वा कुंकुमेन पाणिभ्यां मुखमंगानि लिप्त्वा अनातो स्वनात्तो हं भूयासमिति शिरसि स्रजं
29 बध्वा देवानां प्रतिष्ठेस्थः सर्वतो मा पातं इत्युपानहौ धृत्वा दिवश्छद्मासीति छत्रं वेणुरसि वानस्पत्योसि
सर्वतो मा पाहीति वैणवं दंडं धृत्वा आयुष्यमिति सूक्तस्य सनकसनंदनसनातनादय ऋषयः हिरण्यं दे
वता॰ आद्यावनस्तो नुष्टुभः पंचमी त्रिष्टुप् षष्ठ्यनुष्टुप्॰ सप्तमी शक्वरी॰ अष्टमीनवम्यौ त्रिष्टुभौ द राम
शम्यनुष्टुप् एकादशी जगती कंठे मणिधारणे विनियोगः आयुष्यं वर्चस्यं रायस्पोषमौद्भिदं॰ इदं हिर २९
ण्यं वर्चस्वज्जैत्रायाविशतादु मां॰ उच्चैर्वाजि पृतनाषाट् सभासाहं धनंजयं॰ सर्वाः समग्रा ऋद्धयो हिर
ण्येस्मिन् समाहिताः शुनमहं हिरण्यस्य पितुर्नामेव जग्रभ तेन मां सूर्यत्वचमकरं पुरुषप्रियं॥ सम्राजं च

विराजं चाभिश्रियो च मे ध्रुवा॰ लक्ष्मी राष्ट्रस्य या मुखे तया मा मिंद्र संसृज॰ अग्नेः प्रजातं परि यद्धिरण्यम
मृतं जज्ञे अधि मर्त्येषु॰ य एनद्वेद स इदेनमर्हति जरामृत्युर्भवति यो बिभर्ति॰ यद्वेद राजा वरुणो यद्वेदे
वी सरस्वती॰ इंद्रो यद्वृत्रहा वेद तन्मे वर्चस आयुषे॰ न तद्रक्षांसि न पिशाचास्तरंति देवानामोजः प्रथमजं
ह्येतत्॰ यो बिभर्ति दाक्षायणा हिरण्यं स देवेषु कृणुते दीर्घमायुः । स मनुष्येषु कृणुते दीर्घमायुः॰ यदा
बध्नन्दाक्षायणा हिरण्यं शतानीकाय सुमनस्यमाना॰ तन्म आ बध्नामि शत शारदायायुष्मान् जरदष्टि
यथा सत्॰ घृतादुल्लुप्तं मधुमत्सुवर्णं धनंजयं धरुणं धारयिष्णु॰ ऋणक्सपत्नादधरांश्च कृण्वदारो
ह मां महते सौभगाय॰ प्रियं मा कुरु देवेषु प्रियं राजसु मा कुरु॰ प्रियं विश्वेषु गोप्त्रेषु मयि धेहि रुचा रुचं॰
अग्निर्येन विराजति सूर्यो येन विराजति॰ विराड्येन विराजति तेनास्मान्ब्रह्मणस्पते विराजं समिधं कु
रु॰ तूष्णीमुष्णीषेण शिरः संवेष्ट्य उपानहौ सव्यं पूर्वं समिधं गृह्णाति छत्रं गृह्णाति ॥ यात्॰ मंत्रास्तु॰

३० स्मृतं च मऽ इत्यादीनां प्रजापतिरग्निरष्टी · समिदाधाने वि० स्मृतं च मेऽ स्मृतं च मे तन्म उभयं व्रतं · निंदा च मे ·
अनिंदा · विद्या · अविद्या · श्रद्धा · अश्रद्धा · प्रज्ञा · अप्रज्ञा · इष्टं · अनिष्टं · दत्तं अदत्तं · अधीतं · अन
धीतं · कृतं अकृतं · सत्यं · असत्यं · श्रुतं · अश्रुतं · व्रतं · अव्रतं · यदग्ने सेंद्रस्य सप्रजापतिकस्य सदे
30 वस्य सदैव राजन्यस्य सऋषिकस्य सऋषि राजन्यस्य सपितृ राजन्यस्य समनुष्यस मनुष्य राजन्यस्य
साकाशस्य सातीकाशस्य सानूकाशस्य सप्रतीकाशस्य सदेव मनुष्य स गंधर्वाप्सरस्कस्य सहारण्यै
श्चपशुभिर्ग्राम्यैश्चयन्मआत्मन आत्मनि व्रतं तन्मे सर्वं व्रतमिदमग्ने सर्वव्रतो भवामि स्वाहा · अग्नय राम
इदं · ततो दश समिधो गृहीत्वोपविश्य ममाग्न इति दशानां विरूप्यो विश्वेदेवास्त्रिष्टुप् · अंत्या जगती · स ३०
मिदाधाने वि० ममाग्ने वर्चः १ मम देवाः २ मयि देवाः ३ मह्यं यजंतु ४ दैवीः षडुर्वीः ५ अग्ने मन्युं ६ धाता
धातॄणां ७ उरुव्यचा नः ८ ये नः सपत्ना ९ अर्वाचमिंद्रं १० ततः स्विष्टकृदादि शेषं समापयेत् · नैमित्ति

कं विना न तं नग्नश्च न स्नामि॰ न मांसाम्त्रिः यं नेक्षे॰ वर्षति न धावामि॰ वृक्षं नारोहामि कूपं नावरोहामि॰ प्राण
संशयं नाप्यापद्ये २ इति॰ ततः कौपीनं दंडमेखलादि विसृज्य त्रिरात्राशौचं इति कमलाकरभट्टीः कृतौ समा
वर्त्तनं अथ विवाहः वरपिता कन्याकरौ चंदनेनुलिप्य सवैः सह निरीक्ष्य॰ कन्यां याचयित्वा॰ कन्यादा
ता कन्याया वामतः प्राङ्मुख उपविश्य देशकालौ संकीर्त्य विवाहांगतया वाग्दानं करिष्ये तदंगतया गणे
शं संपूज्य कलशं संस्थाप्य वरुणं संपूज्य गौरीर्मिमायेति कन्यां गंधवस्त्रपुष्पैः संपूज्य हिरण्यरूप इति मु
द्रिकादि गुडखाद्यादि निवेद्य कन्यापिता हरिद्रापूगीफलान्यादाय अमुकप्रवरामुकगोत्रायामुकप्रपौत्राया
मुपौत्राया अमुकपुत्रायामुकशर्मणे वराय अमुकगोत्रामुकप्रपौत्रीममुकपौत्रीममुकपुत्रीममुकनाम्नी
कन्यां वरार्थिनीं ज्योतिर्विदादिष्टे मुहूर्ते दास्ये इति वरपितुर्वस्त्रे बध्वा॰ अव्यंगे अपतिते अक्लीबे दशदोषवि
वर्जिते॥ इमां कन्यां प्रदास्यामि देवाग्निगुरुसंनिधौ॰ वरपिता तु अमुकगोत्रोसन्नवरविषमे भवंतो निश्चिं

३१ ताऽस्ति कन्यापितुर्वस्त्रे वध्नी मातृ ततःवा चादत्ता मया कन्या वरार्थे स्वीकृता त्वया० कन्यावलोकनविधौ
निश्चिंतस्त्वं सुखी भवेति० कन्यापिताः वाचादत्ता त्वया कन्या पुत्रार्थे स्वीकृता मया वरावलोकनविधौ नि
श्चिंतस्त्वं सुखी भवेति परस्परं वदेत्० ततो हिं कृण्वती १ समिधं स्वं श्रयमाणः २ वनस्पते शतवल्शाः ३
31 इंदुर्देवानां ४ अस्य पिव पघ तादु लुप्तं ६ गृह्णा वे प्रतिष्ठा० आशिर्षं विप्राद् घुः इति वाग्दानं० विवाहा
त्पूर्वदिने तद्दिने वाऽस्यां गंकृलादेशकालौ स्मृत्वाऽमुकस्या मुकनाम्न्या वा करिष्यमाण विवाहे निर्वि
घ्नतासिध्यर्थं गणेशपूजनं पुण्याहवाचनं मातृकापूजनं नांदीश्राद्धं मंडपदेवतास्थापनं च करिष्ये० राम
नांदीश्राद्धांते ऽक्षत्रपूर्णे मृण्मयपात्रे द्वयेऽविघ्नपमात्रपत्रे शुभदे सुसमिधः एकस्मिन् कुरिकां चव ३१
ध्वावंशपात्रे नंदिनी नलिनी मैत्रा उमा पशुवर्धिनी भगवती श्वावाहनीरा ज्याभ्यंगं दत्वा संपूज्य मातृ
कापात्रमेतत्पात्रं च सूत्रेणा वेष्ट्य० कनिक्रदद् इति सूक्ते न शुभं दे शोसपत्नीकः गृह्णावे इति प्रतिष्ठाप्य

पूजयेत्॰ आग्नेयनैर्ऋत्यवायव्यैशानस्तंभेषु नंदिनीनलिनीमैत्रोउमां मंडपोपरि तुष्टुवर्धिनी भगवती
च वेष्ट्यित्वास्थापयेदिति मंत्राः इति देवकप्रतिष्ठा॰ ततो वरपूजार्थमागतः कन्यादातावरस्य सीमांतपू
जनं करिष्येइ॥सुक्त्वा गणेशं वरुणं च संपूज्य अस्मिन्राष्ट्रे इति वरस्य पादौ प्रक्षाल्य गंधवस्त्रपुष्पैः
संपूज्य भद्रं कर्णेभिः द्रविणोदाद्रविणसः॰ सविता पश्चात्तात्॰ नवोनवो॰ उत्यादिवि॰ गृहावैप्र॰ सप्त
लपेति वा॰ ततो वरपक्षीयाणां पूजनं॰ ततो नारिकेलहस्तो वरः स्वस्ति न इति सूक्तेनाश्वेन कन्यागृहंग
छेत् वरपिता कन्यायाः फलैः पूजनं करिष्ये इत्युक्त्वा गणेशं वरुणं कन्यां च प्राग्वत्संपूज्य वस्त्रालंकारादि
दत्वायाः फलिनीरिति नारिकेलं दत्वा अर्वाची सुभगे इति पूगीपूगीफलैः स्तांबूलपर्णैश्च संपूज्य आशिषो द
लाप्राग्वत्॥ अथ मधुपर्कः॥ कन्यापिता देशकालौ संकीर्त्य गृहागतं स्नातकं वरं मधुपर्केणार्हयिष्ये॰
गृहागताय स्नातकायास्मै वराय कन्यादानांगभूतं मधुपर्कं करिष्ये इति वा संकल्प्य॰ विष्टरो३त्रिः॰ वरं प्र

तिगृह्यतामितिपंचविंशतिकुशपत्रकृतं विष्टरं दद्यात् वरः प्रतिगृह्णामीत्यादय: अर्हं वर्ष्मेति वामदेवो
३२ विष्टरोनुष्टुप् ॰ विष्टरोपवेशने वि॰ अर्हं वर्ष्म सजातानामुद्यतामिव सूर्यः॰ इदं तमधितिष्ठामि यो
माकश्चाभिदासति॰ इत्युदगग्रे विष्टरे आविशेत सौत्रमंत्रेऋष्यादिस्मरणं नेति प्रयोगपारिजाते ततः
32 पाद्यं३ प्रतिगृह्यतामिति हस्तयोर्दद्यात्॰ अस्मिन्राष्ट्रे इ॰ ति दक्षिणसव्ययोः क्षालनं॰ ततो दाताऽर्घ्य
३मिति त्रिरुक्त्वा प्रतिगृह्यतामिति हस्तयोर्दद्यात्॰ आचमनीयं३ प्रतिगृह्यतामिति आचमनीयं दत्तं
वरो गृहीत्वा अमृतोपस्तरणमसीति॰ आचम्य शेषं संस्थाप्य चामेत्॰ ततो दधिमधुघृतं वाम धुप राम
र्कं कांस्य पात्रस्थं चक्षुषा प्रतीक्षेइतिवरः प्रेक्षेत दाता मधुपर्कं पिहितं मधुपर्को३ प्रतिगृह्यतामिति वदे ३२
त् वरो देवस्य त्वेति अंजलिना प्रतिगृह्य सव्ये पाणौ कृत्वांगुष्ठानामिकाभ्यां मधुवाता इति त्र्येनावे
क्ष्य वसवस्त्वा गायत्रेण छंदसा भक्षयंतु रुद्रास्त्वा त्रैष्टुभेन छंदसा भक्षयंतु आदित्यास्त्वा जागतेन छं

दसाम॰ विश्वेत्वादेवा अनुष्टुप्छन्देन॰ दिक्षु निमज्य मृतेस्त्वेति त्रिरूर्ध्वमुत्क्षिप्य विराजोदोहोसीति प्र
थमं प्राश्य लौकिकोदकेनाचम्य॰ विराजोदोहमशीयेति द्वितीयं॰ पूर्ववदाचम्य मयिदोहः पद्यायै विरा
ज इति तृतीयं॰ पुनराचम्यामृतापिधानमसीति आचमनीयजलशेषं सर्वं मह्रीलाससे यशः श्रीर्म
यि श्रीः श्रयतामिति प्राश्य लौकिकोदकेनाचम्य दात्रा गौर्गौरिति निवेदितां गां प्रतिगृह्य मातारु
द्राणामित्यस्य भार्गवो जमदग्निर्गौस्त्रिष्टुप्॰ गोरुत्सर्जने॰ मातारुद्राणां ॐ मुत्सृजतेति विसृजेत् तती
राज्यं गन्धपुष्पयुतापवीतालङ्कारानुदद्यात् प्राग्वदाशिषः इति मधुपर्कः॰ ततोन्तःपटं धृत्वा
पश्चिमामुखो वरः प्राङ्मुखीं कन्यामीक्षेत॰ अभ्रातृघ्नीं वरुणापतिघ्नीं बृहस्पते॰ इन्द्रापुत्रघ्नीं ल
क्ष्म्यं तामस्यै सवितः सुवेति जपन्वीक्षेत ततो वरः अघोरचक्षुरपतिघ्न्येधीति जपिलादर्भाग्रेण
स्त्री भ्रूमध्ये भूर्भुवः स्वरोमिति व्याहृतीभिः स्पृष्ट्वा दर्भं निरस्यापउपस्पृशेत् ततः ऋ ॐ वाइदमग्ने

३३ इत्यक्षतारोपणान्ते अन्तःपटं निधाय मुखं वरं प्रत्यङ्मुखीं कन्यां कृत्वा समार्योदातोदङ्मुखः का
स्यपात्रे वरहस्तं जलोपरि कन्यां जलोपरि स्वहस्ते जलधारया कन्यादानं कुर्यात् यथा देशकालौ
सङ्कीर्त्य मम समस्तपितॄणां निरतिशयसानन्दब्रह्मलोकावाप्त्यादिकन्यादानकल्पोक्तफलावाप्त
ये ऽनेन वरेणास्यां कन्यायामुत्पादयिष्यमाणसन्तत्या द्वादशावरान् द्वादशपरान् पुरुषान् पवित्रीक
र्तुमात्मनश्च श्रीलक्ष्मीनारायणप्रीतये ब्राह्मविधिना यथाशक्त्यलङ्कृतकन्यादानमहं करिष्ये इति सं
कल्प्य कन्यां कनकसंपन्नां कनकाभरणैर्युतां दास्यामि विष्णवे तुभ्यं ब्रह्मलोकजिगीषया विश्वम्भरः राम
सर्वभूताः साक्षिण्यः सर्वदेवताः इमां कन्यां प्रदास्यामि पितॄणां तारणाय च ततो वधूवरौ तिष्ठेतां क ३३
न्या तारयतु पुण्यं वर्धतां शिवा आपः सन्तु सौमनस्यमस्तु अक्षतं चारिष्टं चास्तु दीर्घमायुः श्रेयः शां
तिः पुष्टिस्तुष्टिश्चास्तु तिथिकरणमुहूर्तनक्षत्रसम्पदस्तु यत्पापं तत्प्रतिहतमस्तु यच्छ्रेयस्तदस्तु पुण्या

हं भवंतो ब्रुवंतु ॐ पुण्याहं स्वस्ति भवंतो ब्रुवंतु आयुष्मते स्वस्ति ऋद्धिं भवंतो ब्रुवंतु ऋध्यतां श्री
रस्त्विति भवंतो ब्रुवंतु अस्तु श्रीः अमुकगोत्रोत्पन्नः अमुकशर्माहं मम सकल पितॄणां निस्तारार्थं लक्ष्मी
नारायण प्रीतये इदं संतेनामुक प्रवरान्विताया अमुक प्रवरान्विताया अमुकस्य पौत्राया अमुकस्य पौत्रा या अमुक
पुत्राया अमुकशर्मणे वराय कन्यार्थिने श्रीधररूपिणे अमुक प्रवरान्वितामुकगोत्रोत्पन्नाममुकस्य पौत्री
ममुकपौत्रीममुकपुत्रीममुक नाम्नीं कन्यां श्रीरूपिणीं वरार्थिनीं प्रजापति देवतां यथाशक्त्यलंकृ
तां प्रजोत्पादनार्थं तुभ्यमहं संप्रददे न मम वरः ॐ स्वस्ति कन्यादानेन ममेति केचित् कन्यां प्रतिगृह्ण
तु भवान् प्रतिगृह्णामीति वरः। गौरीं कन्यामिमां विप्र यथा शक्ति विभूषितां। गोत्राय शर्मणे तुभ्यं द
त्तां विप्र समाश्रय। कन्ये ममाग्रतो भूयाः कन्ये मे देवि पार्श्वयोः कन्ये मे पृष्ठतो भूयास्त्वद्दानान्मोक्षमाप्नु
यां। मम वंशे कुले जाता पालिता वत्सराष्टकं। तुभ्यं विप्र मया दत्ता पुत्रपौत्र प्रवर्धिनी धर्मे चार्थे च

कामेचनातिचरितव्यात्वयेयं॰ नातिचरामीतिवरः॰ एवंत्रिः त्तीयेवरः देवस्यत्वा॰ प्रतिगृण्हामिकंद
देकस्माअदात्॰ दृष्टिरसि॰ द्यौस्त्वाददातुपृथिवी प्रतिगृण्हात्विति कन्यामभिमृशेत्॰ धर्मप्रजा
सिध्यर्थंकन्यांप्रतिगृह्णामीतिवदेत्॰ गौरीकन्यामिमांदि॰ ऋ॰ तस्यकन्यादानस्यसांगतासिध्यर्थंइ
दंहिरण्यंदक्षिणांतुभ्यमहंसंप्रददे॰ नमम॰ कृतस्य॰ इदंमो जलपात्रंउपपात्रद्वयंजलपात्रंचसंप्रद
दे॰ शाक्तौ शासांगोमहिषीदास्यादिदद्यात्॰ ततः यत्कक्षीवांसंवननोविश्वेदे। वानुष्टुप्कुक्ष्यभिम
र्शनेविनियोगः यत्कक्षीवांसंवननंपुत्रो अंगिरसाभवेत्॰ तेननोद्यविश्वेदेवाः संप्रियांसमजीज राम
नत्इतिदक्षिणकुक्षिमभिमृशेत् ततः पुरोहितः अनाधृष्टमस्यनाधृष्यंदेवानामोजो अभिसस्ति ३४
पाः अनभिसस्तंजसासत्समुपगेषां १ स्वितेमाधाइतिनलमभिमंत्र्य॰ समुद्रज्येष्ठाः ४ आपोहिष्ठा॰
३ आनःप्रजां॰ ४ इत्यभिषेकः द्वयोः॰ ततोदुग्धाक्तेनद्विगुणशुक्लसूत्रेणदंपती कंठदेशेकटिदेशेच

ईशानीमारभ्य पंचवारं चतुर्वारं वा प्रदक्षिणं वेष्टयेत् पुरोधा एतैर्मंत्रैः ॐ परित्वा ता न्वो महः दशाव
निभ्यः ते अद्रयः ते सोमादः ष्षायो अभ्रं स्तुरिति चतुः पंचकृत्वो वा द्विसूत्र्या उपर्यधः अवेष्टयित्वा ऊ
र्ध्वमधो निष्कास्य विश्वेत्तात इति वरो वधूवामहस्ते वधूश्चाधस्तनमुपरिनिष्कास्य नीललोहितमि
ति वरहस्ते बध्नीयात् नीललोहितं भवति॰ ततः अग्ने विश्वेभिर्वीतहव्यो भिस्त्रिष्टुप्॰ ऊर्णास्तुकं बंध
ने॰ अग्ने विश्वे॰ वध्वा दक्षिणोत्तरयोः केशपक्षयोर्मंत्रावृत्त्या ऊर्णां बध्नीयात्॰ इदं कृतान्तं॰ ततो
वरो वधूहस्ते क्षीराज्येनोपस्तीर्य द्विरक्षतानोप्याभिघार्य वरहस्ते कन्यापित्राप्येवं कारयित्वा कन्या
मुद्धृत्य तयाञ्जलिस्थान् अक्षतान् भगो मे कामः समृध्यतां वरमूर्ध्नि रोपयेत्॰ वरः यशो मे कामः॰
कन्याशिरसि॰ द्वितीये श्रियो मे कामः वधूः धर्मो मे॰ वरः॰ तृतीये प्रजा मे॰ वधूः यशो मे॰ वरः कन्या
वरांजलिं द्विरुपस्तीर्य द्विस्तंडुलैः रापूर्य द्विरभिघार्य दात्रान्येन पूरयित्वा वरः यशो मे॰ कन्यामूर्ध्नि॰

कन्याभगो मे॰ धर्मो मे वरः श्रियो मे वधूः यशो मे वरः प्रजा मे वधूः सप्तमे तूष्णीमक्षतारोपणं॰
३५ अथ वरः स्वशिरः पुष्पमेकं क्षीरेणाप्लाव्य कन्याललाटे तिलकं कुर्यात्॰ सापि स्वशिरःपुष्पेण तथै
व वरललाटे तिलकं कृत्वा पुष्पमालां वरकंठे निदध्यात् वरोपि कन्याकंठे॰ वधूवरौ प्राङ्मुखावु
35 पवेश्य वस्त्रद्वयं सकंचुकं कुसुममति सूत्रं वध्वै समर्पयेत् तत्सूत्रं वधूकंठे बध्नीयात्॰ मांगल्यतं
तुनानेन मम त्वं जीवनहेतुना॰ कंठे बध्नामि सुभगे सा जीव शरदः शतं॰ वधूकंठे मंगलसूत्रं बध्वा
चरिष्यमाणविवाहकर्मतन्निर्विघ्नतासिध्यर्थं लड्डुकफलहरिद्रादो गणेशं संपूज्य गणानां त्वा॰ अ राम
त्र नंद्रः॰ विश्वेत्ताते॰ वधूवस्त्रे॰ नीललोहितं वरवस्त्रे॰ ततो सौभाग्यार्थं महालक्ष्मीपार्वतीशची
च पूजयेत्॰ संकल्पः॰ मम सौभाग्यप्राप्त्यर्थं इन्द्राणीपूजनमहं करिष्ये॰ प्रार्थयेत् देवीन्द्राणि नम ३५
स्तुभ्यं देवेन्द्रप्रियभामिनि॰ विवाहं भाग्यमारोग्यं पुत्रलाभं च देहि मे॰ सुवासिनीभ्यः सौभाग्यद्र

य्यादिदानं कुर्यात्· आशिषो मंत्राः भद्रं कर्णेभिः द्रविणोदाः सविता पश्चा· न वो न वो· उच्चा दिवि·
दक्षिणावतां· इति कन्यादानप्रयोगः अथ विवाहहोमः प्राणानायम्य देशकालौ स्मृत्वा अस्यां
परिगृहीतायां वध्वां भार्यात्वसिद्ध्यर्थं गृह्याग्निसिद्ध्यर्थं च विवाहहोमं करिष्ये· तदंगतया स्थंडि
लोल्लेपनाद्यग्निप्रतिष्ठापनांते अग्नेः स्वगृह्योक्तं सोपलां प्रतिष्ठां व्याग्नेरीशाने उदकुंभं उदगग्नेः
सप्त तंडुलराशीः प्रकल्प्य अन्वाधानं अस्मिन्नन्वाहिते ग्नावित्यादि आघारांते· नात्र चक्षुषी· अ
त्र प्रधानं· त्रिरग्निं पवमानं अग्निं प्रजापतिं वा ज्येन अर्यमाग्निं वरुणाग्निं पूषाग्निं प्रजापतिं च ला
जद्रव्येण शेषेण स्विष्टकृतमित्यादि आघारांते अग्न आयूंषीति तिसृणां शतं वैखानसा ऋषयः अग्निः
प· ता गायत्री· विवाहप्रधानाज्यहो· अग्न आयूंषि स्वाहा अग्नये पवमानायेदं· अग्निर्ऋषिः· अग्ने पव
स्व· त्वमर्यमा वसुश्रुतो ग्निस्त्रिष्टुप्· विवाहप्र· त्वमर्यमा· अग्नय इदं· प्रजापते हिरण्यगर्भः प्रजा

पतिस्त्रिः प्रजापतयइदं॰ ततः पश्चिमाग्निमुखस्तिष्ठन्॰ गृभ्णामीति स्वर्यां सावित्री२ त्रिष्टुप्॰ पत्न्याःपा

३६ णीत्वासि प्रयेपाणिग्रहणे वि॰ गृभ्णामि ते॰ इति उत्तानेन हस्तेन सांगुष्ठं करे गृहीत्वा वधूं जलावुपस्ती

यस्नाताद्विलाजानावपतिः त्रिः पंचावत्तिनः हविरवत्तं चाभिघार्यार्यमणं वरुणं पूषणमिति त्रयाणाम

36 न्त्राणां वामदेवो यमाग्निर्वरुणाग्निः पूषाग्निरनुष्टुप् पृथिवाहप्रधानं॰ लाजहोमः॰ अर्यमणं तु॰ तिष्ठ

तीजुहुयात् अर्यम्णोऽग्नय इदं॰ अमो हमस्मि॰ शरदः शतं॰ ततो वधूं प्राङ्मुखीं द्वाभ्यामभिपादाभ्यां

दृषदं॰ इममश्मानमारोहाश्मेव त्वं स्थिरा भव॰ सहस्व॰ पृतन्यतः मंत्रेणारोपयेत्॰ उपस्तरणादिपू राम

र्ववत्॰ वरुणं नु॰ वरुणाग्नय इदं॰ अमो हं॰ इममश्मानं॰ पुनर्लाजानवदाय॰ पूषणं नु॰ पूष्णेऽग्न ३६

य इदं॰ अमो हं॰ इममश्मानं॰ प्रजापतये स्वाहेति शूर्पपुटेन चतुर्थं तूष्णीं॰ ततः यदि वेरापक्षीव

स्योतदा प्रत्वा मुंचामीति॰ दक्षिणां॰ प्रेतो मुंचामि सुत्तरांशिखां मुञ्चेत् तान्यां सप्तते दुल्वमुंजेषु॰ इ

षएकपदी भव॰ सामामनुव्रता भव॰ पुत्रान्विंदावहै॰ दष्टयः ऊर्जे द्विपदी भव॰ सामा॰ रायस्पोषा
यत्रि॰ मायोभव्यायच॰ प्रजाभ्यः पंचपदी॰ ऋतुभ्यः षट्पदी॰ सखास॰ सामामनुव्रता भव॰ उभयोः
संनिधाय शिरसी उदकुंभेनावसिञ्च॰ शांतिरस्तिस्ताहुक्ता॰ ध्रुवं पश्य॰ अरुंधतीं पश्य॰ सप्तर्षी
न्पश्य॰ जीवपत्नी प्रजां विंदेयेत्युक्ता॰ स्विष्टकृदादि शेषं समापयेत् इति विवाहहोमः ततः कन्या
पितुः प्रार्थनां कृत्वा गृहं गत्वा तत्रैव वा देशकालौ स्मृत्वा विवाहाग्नेर्गृह्याग्नित्वसिद्ध्यर्थं च गृहप्रवेश
नीयहोमं करिष्ये तत्रादेवतापरिग्रहार्थमन्वाधानं करिष्ये॰ अस्मिन्नन्वाहितेग्नावित्यादि चक्षुषी
आज्येनेत्यंते सूर्यासावित्री चतुर्थ्या आज्येन शेषेण स्विष्ट॰ चक्षुर्यंते॰ आनः प्रजामिति चतसृणां सूर्या
सावित्री ऋ॰ आद्या जगती द्वितीया त्रिष्टुप्॰ अंत्ये द्वे अनुष्टुभौ॰ गृहप्रवेशनीयप्रधा॰ नाज्यहोमे वि॰
आनः प्रजां स्वाहा॰ सूर्यासावित्र्या इदं॰ अघोरचक्षुः॰ इमां त्वमिंद्र॰ सम्राज्ञी इति हुत्वा॰ समंजंति

ति सूर्या सावित्री २ अनुष्टुप् ॰ हृदयां जनेवि॰ इति दधिप्राशीयात् ॰ आज्यशेषेणवाऽनक्ति हृदये॰
३७ स्विष्टकृदादि समाप्य विप्रान् भोजयेत् ॰ इति गृह्यवेशनीयहोमः चतुर्थेदिने देशकालौ स्मृत्वा
गणेशं संपूज्य कन्यादानस्य सांगतासिद्ध्यर्थं वरस्य तत्सखीयाणां च पूजनं च कृत्वा वधूसीमंते सुमं
37 गलीरिति सिंधूरं दत्वा मांगल्यतंतुनेति मंगलसूत्रं बध्नीयात् ततः सवस्त्रफलतांबूलं दद्यात्सो वंशं
वर्धनं ॥ ऐरिण्याख्यं वंशपात्रं पक्वान्नैः परिपूरितं॰ करकैः रुद्रसंख्याकैः सुवर्णपरिपूरितैः ॥ एता
वंदैरिणी रूपं कर्त्तव्यं किल सूरिभिरित्युक्तेः वंशपात्रे ऐरिणी त्वमुमादेवि महेशो गिरिजापतिः ॥ राम
अतस्त्वां पूजयिष्यामि ऐरिणीं सर्वकामदां ॥ सवस्त्रां च सदीपां च भूषैः षोडशभिर्युतां ॰ वरमात्रे ३७
प्रदास्यामि कन्यादानस्य सिद्धये इति पठित्वा संपूज्य इदं वंशपात्रं षोडशभूषायुतं वरमात्रे संप्र
ददे न मम मे सुताः पठेत् वंशो वंशकरः श्रेष्ठो वंशो वंशसमुद्भवः ॥ अनेन वंशदानेन तुष्टो ऋद्धिं करो

तुमे १ वंशपात्रमिदं पुण्यं वंशजातसमुद्भवं ॥ वंशानामुत्तमं दानमतः · छमे २ वंशपात्राणि सर्वाणि म
या संपादितानि वै · उमाकांताय दत्तानि मम गोत्राभिवृद्धये ३ वंशवृद्धिकरं दानं सौभाग्यादिसमन्वि
तं · वस्त्रेणाच्छादितं पूगफलहेमसमन्वितं ॥ ४ ॥ सर्वपापक्षयकरं नानाद्रव्यैः सुपूरितं · दानानामुत्त
मं दानमतः · छैमे पततः स्वस्तिनोमिमीतामितिसूक्तेन वरपक्षीयाणां शिरसि निधाय · वंशाभिवृद्धिर
स्तु · इत्याशिषं दद्यात् · अष्टवर्षा भवेत्कन्या पुत्रवत् पालिता मया · इदानीं तुभ्यं मया दत्ता स्नेहेन पा
ल्यतां · इति वरांके तवसुत्रायेस्नेहेन मातुरंके उपवेशयेत् · इति सैरिणीदानविधिः · अथ दैवकोत्थाप
नं · गणेशं संपूज्य कनिक्रददितिसूक्तेन देवकस्थापितदेवता आनीय अभ्यंगपूर्वकं षोडशोपचा
रैः संपूज्य · उत्तिष्ठ · अभ्यारमितिविसर्ज्य पुण्याहं वाचयित्वा · अभिषेकान्ते प्रति चेति चेति प्रतिचे
ति चेलेतद्वै सर्वेस्वस्त्ययनं यज्ञेति चेति चेति तथा स्वप्निपस्मात्तयेते नानुमंत्रयेत प्रतिचेति चेति स्व

स्त्वेवं गच्छति स्वस्ति पुनरागच्छति चेत्यनेन वंशपात्रेण मातृकाजलं सर्वेषां शिरसि दद्यात्॥ वंशाग्निं स्थंडिलाच
३८ यीत॥ ततो वरश्चतुर्थे पंचमे सप्तमे वाह्नि नवधूं पूषा त्वेतो नयतु हस्तगृह्येति यानमारोहयेत् अश्मन्वती रीयते
संरभध्वमित्यर्धर्चेन नावमारोप्योत्तरेण पारं सुतार्य रुदंत्यां जीवं रुदंतीति जपेत्॥ विवाहाग्निं प्रसक्तं न
38 यंति न समारोपेण॥ मा विदन् परिपंथिन इति सुदेशे प्रवसतो॥ सुमंगलीरियं वधूरिति ईक्षकान् पश्येत्॥
इह प्रियं प्रजा॰ तामिति गृहं प्रवेश्य गणेशं संपूज्य पुण्याहं वाचयित्वा लक्ष्मीसक्तुमिवेति तउनेति षोडशोप
चारैः संपूज्य विवाहाग्निं निधाय च॥ इह कर्मणि पत्नीमुपवेश्य पूर्वोक्तं गृहप्रवेशनीयहोमं कुर्यात्॥ शिष्टा राम
स्तु श्वशुरगृहे एव कुर्वंति॥ ततो मंडपोद्वासनं प्रागवत् कुर्यात् इति कमलाकरभट्टकृतो विवाहप्रयोगः ३८
अथौपासनप्रयोगः कर्त्ताऽरत्निमात्रे षोडशांगुले ऽन्यांतरपि शालमात्रे वाह्नि त्रिचतुरंगुलत्रिमेखले वा
कुंडे वक्ष्यमाणविधिना संस्कृतेग्निं प्रतिष्ठाप्य प्रसवरोहेति मंत्रेण प्रसवरो त्वसि संवासायमधिवृक्षे प्रा

तरुद्याज्ञागग्निं प्रादुष्कृत्य सायं संध्यां तद्देशकालौ संकीर्त्य परमेश्वरप्रीत्यर्थं सायमौपासनहोमं करि
ष्ये इत्युक्त्वा चत्वारि शृंगेति ध्यात्वाग्निः परिसमूह्य परिस्तीर्य पर्युक्ष्योत्तरतोऽग्नेस्तंडुलान्दर्भैर्णोज्वल्यप्रो
क्ष्य तयैवाग्निः पर्यग्निकृत्वोल्मुकं निरस्याप उपस्पृश्य पश्चादग्नेर्हविः समिधं च निधाय विश्वानि न इति द्वा
भ्यामग्निमभ्यर्च्य तृतीयया सांजलिर्नमस्कृत्य संपूज्य दक्षिणं जान्वाच्य तूष्णीं समिधमादायापः स्पृष्ट्वा
शतं षष्टिं वा तंडुलान् आदाय हृदि सव्ये निधाय · ॐ अग्नये स्वाहेति सायं सूर्याय स्वाहेति प्रातः कनिष्ठा
मूलेन हुत्वा एवं प्रजापतये स्वाहेति द्वितीयां हुत्वा परिसमूह्य पर्युक्ष्य सायमग्न आयूंषीति तिसृभिः अ
ग्ने त्वं न इति चतसृणां गौपायनाः लौपायना वा बंधुः सुबंधुः श्रुतबंधुः विप्रबंधुश्च ऋषयोऽग्निर्द्विपदा वि
राट् इति सायं सूर्यो नो दिवः ५ उदु त्यं २ चित्रं देवानां २ नमो मित्रस्य २ प्रातः १ प्रजापते न त्वदे· तं तु न्वतरः इत्यु
भयं प्रजापतिं चोपस्थायमानं स्तोक इति विभूतिं ध्यात्वा च मह इत्युपस्थाय नाम गोत्रे उक्त्वाभिवादयेत् इत्यु

३९

39

पासनहोमः अथ मद्भैरर्कविवाहस्यानुष्ठानार्हप्रयोगस्यानुक्रमात्सोभिधीयते॰ वरः कृतनित्यक्रियो
रविशनिवासरयोर्हस्तनक्षत्रे॰ अस्मिन्वा शुभेह्नि ग्रामात्प्राच्यां वार्कं गत्वा देशकालौ संकीर्त्य मम तृतीयमानु
षीपरिणयनजनितसर्वारिष्टशान्त्यर्थं अर्कविवाहं करिष्ये तदङ्गतया दौ गणेशपूजनं स्वस्तिवाचनं मातृ
कापूजनं नान्दीश्राद्धानि कृत्वाचार्यं वृणुयात् ततः आचार्यो वरो वा आकृष्णेनेति मन्त्रेण अर्कं छायासहितं सू
र्यमावाह्य षोडशोपचारैः संपूज्य गुडोदनं नैवेद्यं समर्प्य वस्त्रेण तं तु निश्चा वेष्ट्य प्रार्थयेत्॰ त्रिलोकवासि
न् सप्ताश्व छायया सहितो रवे॰ तृतीयोद्वाहजं दोषं निवारय सुखं कुरु॰ ततो वरः जलमादाय त्रिः प्रदक्षिणं
परिषिञ्चेदेति मन्त्रैः॰ मम प्रीतिकरा येयं मया सृष्टा पुरातनी। अर्कजा ब्रह्मणा सृष्टा अस्माकं प्रतिरक्षतु॰ राम
नमस्ते मङ्गले देवि नमः सवितुरात्मने॰ त्राहि मां कृपया देवि पत्नी त्वं मे इहागता॰ अर्क त्वं ब्रह्मणा सृष्टः स ३९
र्वप्राणिहिताय च॥ वृक्षाणामादिभूतस्त्वं देवानां प्रीतिवर्धना॰ तृतीयोद्वाहजं पापं मृत्युं चाशु विनाशय॰ त

तो वरः वाग्दानस्थानीयं पुनरर्कस्य पूजनं कृत्वा वाग्दानं कुर्यात् ॰ तत्रायं क्रमः ॰ स्वगोत्रास्थु॰ काश्यपावत्सा
रनैध्रुवेति त्रिप्रवरान्वित काश्यपगोत्रोत्पन्नां आदित्यस्य प्रपौत्रीं सवितुः पौत्रीं ममामुकशर्मणः पुत्री
ममुकनाम्नीं कन्यां अमुकप्रवरोपेतायामुकगोत्रायामुकप्रपौत्रायामुकपौत्रायामुकपुत्रायामुकना
म्ने वराय अर्ककन्यां दास्ये इति ततः आचार्यो वरस्य मधुपर्कं कारयित्वा सुहूर्तेऽर्कं निरीक्ष्य स्वस्ति नो मिमीते
इति सूक्तं पठित्वा आचार्येणार्ककन्यादानं कारयेत् ॰ तत्रायं क्रमः ॰ वाग्दानवत् स्वगोत्राद्युच्चार्य आत्मन
श्छायासहितसवितृप्रीतय इमामर्ककन्यां सवस्त्रां तुभ्यमहं संप्रददे न मम ॰ उक्त्वा वरहस्ते जलं क्षिपेत्
मंत्रं पठेत् ॰ अर्ककन्यामिमां १ वरः स्वस्ती सुक्त्वा स्वशाखोक्तकाम स्तुतिं पठेत् ॰ ततः कृतस्यैतद्दानकर्म
णः संपूर्णतासिद्ध्यर्थं इमां दक्षिणां संप्रददे ॰ इति हिरण्यं दद्यात् ततो गायत्र्यास्त्रिरावृत्त्य ॰ पंचकृत्वोऽर्क
वरं च सूत्रेणावेष्टयेत् तत्सूत्रं द्विधा कृत्वा एकं गायत्र्यार्कस्य स्कंधे बध्वाऽपरं वरहस्ते आचार्यो बध्नीया

५० मंत्रेण॰ बृहत्साम क्षत्रभृद् इत्यस्य बृहत्सां॰ मिदं वातेन सगरेण रक्ष॰ ततोर्कस्य चतुर्दिक्षु महीद्यौरित्यादिमंत्रा
भ्यसा चतुरः कलशान्संस्थाप्य तत्र प्रतिकुंभं इदं विष्णुरिति मंत्रेण विष्णुं संस्थाप्य प्रतिकुंभं षोडशोपचा
रैः संपूज्य॰ अर्कोत्तरस्थंडिले अग्निं प्रणीयास्मिन्नन्वाहिते ग्नाविष्यादि आघारांतं कृत्वाऽत्र प्रधानं बृह
स्पतिमग्निं अग्निं वायुं॰ सूर्यं॰ प्रजापतिं चाज्येन शेषेण स्विष्टकृतमित्यामि॰ यक्ष्ये इसं तमुक्त्वा॰ संगोभि
रांगिरा बृहस्पतिस्त्रिष्टुप् अर्के विवाहप्रधानाज्यहोमे वि॰ ॐ संगोभिः बृहस्पत॰ इदं॰ ॐ यस्मै त्वा कामं
कामाय वयं सम्राज्य जामहे॰ तमस्मभ्यं कामं दत्वाथेदं त्वं घृतं पिब स्वाहा॰ अग्नय॰ दं॰ व्यस्त समस्तव्या राम
हृतिभिर्हुत्वा होमशेषं समापयेत् आचार्यं संपूज्य तस्मै गोयुग्मं दक्षिणां दत्वा पुनस्त्रिः प्रदक्षिणीकृ ५०
स प्रार्थयेत्॰ मया कृतमिदं कर्म स्थावरे जुजरायुणा॰ अर्कां प्रसानि नो देहि तत्सर्वं क्षंतुमर्हसि॰ ततो
महाशांतिं पठेयुः॰ अस्मिन्कर्मणि दश ब्राह्मणा भोज्याः त्रयो वा यथाशक्ति भूयसीं दत्वा ततश्चतुर्थेदि

नेसत्यो वा पुनरर्कं संपूज्य॰ उत्तिष्ठन्न लग्नस्य ते॰ अम्यारमित्साभ्यां विसृजेत्॰ इत्यर्के विवाहप्रयोगः
अथ स्थालीपाकः मध्याह्नेतस्सूर्यं वा पर्वं प्रतिपत्संधौ पूर्वेद्युरन्वाधानं तद्दिने यागः मध्याह्नादूर्ध्वसं
धौ तद्दिनेन्वाधानं परेद्युर्यागः॰ कर्ता समित्समरोपे प्रतिदिशमष्टादशांगुलं कनिष्ठं चतुरंगुलमेकां
गुलं वोच्चं स्थंडिलं कृत्वा गोमयेनोपलिप्य यज्ञियशकलेन पश्चिमेंगुलं हित्वोदक्संस्थां प्रादेशमात्रां रे
खां कृत्वा तद्दक्षिणोत्तरयोः प्रागग्रे रेखे प्रादेशमात्रे मध्येतिस्रः प्रागग्रा उदक्संस्थाश्च रेखाः कृत्वाग्ना
ग्नेयपात्राभ्यां पिहितमग्निं॰ जुष्टोदमूनाआत्रेयो वसुश्रुतोग्निस्त्रिष्टुप्॰ रस्मग्नेराहुगणो गोतमोग्नि
स्त्रि॰ अग्न्यावाहने वि॰ इति मंत्राभ्यामभ्याज्य समक्षतेरग्निमावाह्य॰ व्याहृतीनां प्रजापतिर्बृहतीछं भू
र्भुवः स्वरोमित्यग्निं प्रतिष्ठाप्य॰ चत्वारिशृंगा गोतमो वामदेवोग्निस्त्रिष्टु॰ इति मंत्रेण॰ सप्तहस्तश्चतुः
शृंगः सप्तजिह्वो द्विशीर्षकः त्रिपात्प्रसन्नवदनः सुखासीनः शुचिस्मितः स्वाहां तु दक्षिणे पार्श्वे दे

वीवामेस्वधां तथा॰ विघ्नदक्षिणहस्ते स्रुशक्तिं मन्नं स्रुचं स्रुवं॥ तोमरं व्यजनं वामे घृतपात्रं च धारयन्॰
४१ आसीनं सुखमासीन एवं रूपो हुताशनः इति ध्यानं इदं लौकिकाग्नौ सर्वत्र होमे विज्ञेयं॰ ततः प्रसन्नो
हजातवेदः मानाय शंयोरिति समारूढ समिध्यमग्नौ क्षिपेत॰ ततस्तत्र धार्येग्नौ वा प्रातर्होमं कृत्वा
41 आचम्य प्राणानायम्य देशकालौ संकीर्त्य ममोपात्तदुरितक्षयार्थं परमेश्वरप्रीत्यर्थं दर्शपूर्णमासा
भ्यां स्थालीपाकाभ्यां यक्ष्ये॰ तत्रेदानीं पौर्णमासेन दर्शेन वा यक्ष्ये इति संकल्प्य॰ ध्यानान्तं कृत्वा समि
द्वयं त्रयमादाय॰ तत्र देवतापरिग्रहार्थमन्वाधानं करिष्ये ऽस्मिन्नन्वाहितेग्नौ जातवेदसमग्निमिध्मे
न प्रजापतिं द्वाघारदेवते आज्येन अग्नीषोमौ चक्षुषी आज्येन अत्र प्रधानं अग्निमग्नीषोमौ चरु राम
द्रव्येण दर्शे तु अग्निमिंद्राग्नी चरुद्रव्येण शेषेण स्विष्टकृतमित्यादि॰ ओ सद्यो वा यक्ष्ये ॐ भूर्भुवः स्वः स्वा ४१
हा॰ प्रजापतय इदं॰ इध्माबर्हिषोश्च सन्नहनं॰ दधिघृतपयोमिश्रं हविष्यान्नं दिवैव सकृद्भुंजीया।

तां॰ आमकृतु आज्यशेषमाधानं भुंजीत॰ ततः प्रतिपदि प्रातरौपासनं हुत्वाऽग्निं परिसमूह्य परिस्तरणी
यात्॰ पर्युक्षणं अग्नेः षोडश त्रिर्दर्भैः प्राग्आदि सुपरिस्तृतिः सुग्मान् प्रादेशमात्रां अपूर्वाग्रान् सर्वदिक्ष
पि॰ कांश्चिदुत्तरतो दर्भान् शास्त्रीयपरिधिं चति· दर्भैः पूर्तरतो द्वंद्वं पात्राणि न्यंचिसादयेत्॰ तत्क्रमं नग
वानारु श्लोके नैके नवतिकृत्॰ दर्भैः स्रुपदक्षिणसव्यपाणिभ्यां क्रमेण चरुस्थाली प्रोक्षण्यौ॰ दर्वी स्रु
वौ प्रणीताज्यपात्रे॰ इध्माबर्हिषी शूर्पकृष्णाजिने॰ उलूखलं मुसलं चेति द्वंद्वं उदगपवर्गं प्राकृसं
स्थं च स्रु आन्यासादयेत्॰ आज्यमात्रहोमे तु प्रोक्षणी स्रुवौ प्रणीताज्यपात्रे॰ इध्माबर्हिषी च तथा
कुर्यात् प्रोक्षणीपात्रमुत्तानं कृत्वा प्रादेशमात्रे द्वे पवित्रे निधाय अद्भिः पूरयित्वा अंगुष्ठोपकनि
ष्ठिकाभ्यां त्रिरुत्पूयपात्राण्युत्तानानि कृत्वा इध्मं च विस्रस्य सर्वाणि पात्राणि त्रिः प्रोक्षेत्॰ प्रणीता
पात्रमग्नेः प्रसङ्गनिधायतत्र पवित्रे निधायोदकं पूरयित्वा गंधपुष्पाक्षतान्निक्षिप्याऽस्मिन् कर्मणि

अ सत्वेन त्वामहंवरणेकृताकृतः यजमानस्तद्गृहीतापात्रंनासिकासमीपेनीत्वोत्तरतोग्नेर्निधायपद
मैराच्छादयेत् तस्य विवित्रेशूर्पेनिधाय अग्नेत्वाजुष्टंनिर्वपामीतिमंत्रावृत्त्या व्रीहीणांचतुरोमुष्टीन्नि
र्वपति अग्नीषोमाभ्यांत्वाजुष्टंनिर्वपामीति तथैवनिरुप्य तेपवित्रेव्रीहीणामुपरिनिधायोत्सूताभिर
द्भिरग्नयेत्वाजुष्टंप्रोक्षामितिनिर्वापसंख्ययाप्रोक्षयेत् एवमग्नीषोमाभ्यांदर्शे तु अग्नीषोमस्थाने
इंद्राग्निभ्यां तथैवप्रोक्षणेविशेषः समंत्रकहोमेतु तूष्णींनिर्वापप्रोक्षणं ततः प्रागग्रीवमूर्ध्वलोम
कृष्णाजिनंनिधायतदुपरि उलूखलंनिधायव्रीहीनोप्यपत्नी तंदुलान् त्रिः शुक्लीकुर्यात् त्रिः प्रक्षा
ल्याग्नौ श्रपयेत् ततः परिस्तरणाद्बहिरुत्तरतोग्नेरंगारानपोह्यतदुपरि आज्यपात्रंनिधायविलीना राम
ज्यंनिक्षिप्यवामहस्तेदर्भाग्रद्वयंधृत्वा एकमुल्मुकमवज्वल्यदर्भाग्रद्वयंनिक्षिप्यउल्मुकेनचरुस ४२
हितंत्रिः पर्यग्निकरणंकुर्यात् उल्मुकंनिरस्यापउपस्पृश्यांगारानग्नौक्षिपेत् अंगुष्ठोपकनिष्ठिका

भ्यां पाणिभ्यां पवित्रे धृत्वा सवितुष्ट्वेति मंत्रस्य हिरण्यस्तूप ऋषिः सविता देवता· पुरउष्णिक्छंदः आ
ज्यस्योत्पवने·ग: सवितुष्ट्वा प्रसव उत्पुनाम्यच्छिद्रेण पवित्रेण वसोः सूर्यस्य रश्मिभिः आज्यमुत्पुनाति स
कृन्मंत्रेण द्विस्तूष्णीं: पवित्रे अद्भिः प्रोक्षाग्नौ प्रहरेत्· ततः स्कंदाय स्वाहेति केचित्· बर्हिरास्तरणं· आज्य
स्थापनं· स्रुक्स्रुवयोः संमार्जनं स्रुवबिलं दर्भाग्रेण त्रिः संमृज्य स्रुवपृष्ठं दर्भाग्रेणासाभिमुखं त्रिः सम्मृ
ज्य कुशमूलेन पृष्ठमादारभ्य बिलपर्यंतं त्रिस्त्रिः संमृज्य प्रोक्ष्य प्रताप्य घृतादुत्तरतः स्थापयेत् तथैव
स्रुचं च संमृज्य दर्भान् प्रोक्ष्याग्नौ प्रहरेत् स्रुवेणाज्यं गृहीत्वा चरुमभिघार्य उदगुद्वास्याज्ययोर्मध्ये
न नीत्वाऽज्याद्दक्षिणतो बर्हिषि सांतरमासाद्य तन्मध्ये एकं पात्रं निधायाग्निमलंकृत्य· विश्वानि न इतीति
सृणामात्रेयो वसुश्रुतोऽग्निस्त्रिष्टुप् द्वाभ्यामर्चनेऽस्योपस्थाने विनि·गः ॐ विश्वानि नो·३पाणि नेध्ममा
दायाभिघार्य· अयं त इध्म इत्यस्य मंत्रस्य वामदेव ऋषिः जातवेदाग्निर्देवता· त्रिष्टुप्छंदः इध्मदहने

वि॰ ॐ अयं त इध्म आत्मा जातवेदस्तेनेध्यस्व वर्धस्व चेसवर्धय चास्मान्प्रजया पशुभिर्ब्रह्मवर्चसेनान्ना
४३ द्येन समेधय स्वाहा अग्नये जातवेदस इदं न मम॰ स्रुवेणाज्यं गृहीत्वा वायव्यदिशमारभ्याग्नेयीपर्यंतं
प्रजापतये स्वाहेति प्रजापतिं मनसा स्मरन् स्वाहेत् स्रुवेणैव मेवनैऋतीमारभ्यैशानीपर्यंतं पूर्वव
43 त्स्रुवा प्रजापतय इदं न ममेत्याघारः उत्तरे अग्नये स्वाहा॰ अग्नय इदं॰ दक्षिणे सोमाय स्वाहा सोमायेदं॰
ततः पात्रान्तरेऽर्धं चरुमुद्धृत्य सेदमग्नये इदमग्नीषोमाभ्यामिति साभिमर्शमन्यस्य स्रुचमुपस्तीर्य मध्यात्पूर्वा
र्धाच्च दक्षिणभागादवदाय पंचावत्ती पश्चिमार्धादप्यवदाय द्विरवत्तं चाभिघार्य हृदि सर्व्यं करं निधा
यामग्नये स्वाहा अग्नय इदं सजानी स्रुक्काए वं द्वितीयभागाच्चरोरवदायाभिघार्य अग्नीषोमाभ्यां स्वाहेति राम
हुत्वा स्रुक्कादर्शे लिंद्राग्निभ्यां द्वितीयां हुत्वा पुनरुपस्तीर्य चरुभागद्वयात्सकृत्सकृदवदाय पंचाव ४३
त्तीद्विरवदाय द्विरभिघार्य यदस्येत्यस्य हिरण्यगर्भ ऋषिः स्विष्टकृद्दतिध्यतिः स्विष्टकृद्धोमे वि॰ ॐ य

रस्य कर्मणो यत्सरीरिचं यद्वा न्यूनमिहाकरं ॥ अग्निष्टत्स्विष्टकृद्विद्वान्सर्वं स्विष्टं सुहुतं करोतु मे ॥ अग्न
ये स्विष्टकृते सुहुतहुते सर्वप्रायश्चित्ताहुतीनां कामानां समर्धयित्रे सर्वान्नः कामान्त्समर्धय स्वा
हा ॥ अग्नये स्विष्टकृते इदं त्रिसंधानं पशुपतये रुद्रायेति हुत्वा ॥ अयाश्चेति विमदो ऽयाग्निः पंक्तिः उ
त्तरां गणः ॥ गः अयाश्चाग्ने स्यनभिशस्तीश्च सत्य मेषजं स्वाहा ॥ अयसे ऽग्नय इदं ॥ अतो देवा इति द्वयो
र्मेधातिथिराद्यायाः देवा द्वितीयाया विष्णुर्गायत्री होमे वि० देवेभ्यः विष्णव इदं ॥ व्यस्तसमस्तव्याहृतीनां
विश्वामित्र जमदग्नि भरद्वाज प्रजापतय ऋषयो ऽग्निवायुसूर्य प्रजापतयो देवताः गायत्र्युष्णिगनु
ष्टुप् बृहत्यश्छंदांसि नः स्वाहा अग्नय इदं भुवः स्वाहा वायव इदं ॥ स्वः स्वाहा सूर्यायेदं भूर्भुवः स्वः स्वा
हा प्रजापतय इदं ब्रह्मण्येताः सप्त जुहुयात् । स एवं ॥ यद्वो देवा अभितपा मरुतस्त्रिष्टुप् अनाज्ञात
मिति मंत्रद्वयस्य हिरण्यगर्भोऽग्निरनुष्टुप् ॥ यत्पाकत्रेत्यस्य स्वस्त्रितोऽग्निस्त्रिष्टुप् ॥ अग्नय इदमिति सर्वं

त्र स्वागः भूर्भुवः स्वः स्वाहेति सर्वप्रायश्चित्तं च ततो द्वादशगृहीतं स्रुचि गृहीत्वा समुद्रादूर्मिरित्येका
४४ दशभिस्त्रिभिर्वा पूर्णाहुतिं विज्योतिषेति शेषं चाग्नये हुत्वा विश्वेभ्यो देवेभ्यः स्वाहेति संस्रावं हुत्वास्त
रानुक्रमकृत्वा वा प्रणीतापात्रं पूर्णमसि पूर्णं मे भूयाः सुपूर्णमसि सुपूर्णं मे भूयाः सदसि सन्मे भूयाः
44 सर्वमसि सर्वं मे भूया अक्षितिरसि मा मे क्षेष्ठाः इत्यभिमंत्र्य कुशैः प्राच्यां दिशि देवा ऋत्विजो मार्जयंतां·
दक्षिणस्यां दिशि मासाः पितरो· प्रतीच्यां दिशि गृहाः पशवो· उदीच्यां दिश्याप ओषधयो वनस्पतयो
मार्जयंतामूर्ध्वायां दिशि यज्ञः संवत्सरः प्रजापतिर्मार्जयतामिति दिक्षु प्रोक्षयेत्· आपो अस्मान्मा राम
तरः शुंधयंतु· इदमापः प्रवहत· सुमित्रिया न आप ओषधयः संत्विति शिरसि दुर्मित्रियास्तस्मै संतु ४४
योऽस्मान्द्वेष्टि यं च वयं द्विष्म इति भूमौ· मा हं प्रजां परासिचं या नः सयावरीः स्थन· समुद्रे वो निनया
निस्वं पाथो अपीथेति वामभागस्थितपत्न्यंजलौ तदभावे स्वांजलौ वा पात्रं निक्षिप्य बर्हिषि निनीय तेना

स्नानं पत्नी चापो हिष्ठेति प्रोक्षण परिस्तरणं च विसृज्याग्निं परिसमुह्य पर्युक्ष्य विश्वानि न इति त्वचेनार्च
५५ यित्वा मानस्तोकेति विभूतिं धृत्वा॰ त्र्यायुषं जमदग्नेः ललाटे॰ कश्यपस्य त्र्यायुषमिति कंठे अगस्त्य
स्य त्र्यायुषं॰ नाभौ॰ यद्देवानां त्र्या॰ दक्षिणस्कंधे॰ तन्मे अस्तु त्र्या॰ वामस्कंधे शतायुषमिति शिरसि॰
45 ततः ॐ च मे स्वरश्च मे यज्ञोपच ते नमश्च यत्ते न्यूनं तस्मै त उप यत्तेऽतिरिक्तं तस्मै ते नमः अग्नये नमः
स्वस्ति श्रद्धां मेधां यशः प्रज्ञां विद्यां बुद्धिं श्रियं बलं॰ आयुष्यं तेज आरोग्यं देहि मे हव्यवाहनेति नत्वा गो
त्रनामभ्यां स्वस्तिकं कृत्वा नमेत्॰ ततो ब्राह्मणेऽस्मै वा दक्षिणां हुतशेषं वा सहिरण्यं दत्वा यस्य स्मृ राम
सेत्युक्त्वा कर्मेश्वरार्पणं कुर्यात्॰ इति श्री जगद्गुरु नारायणभट्टसूनुरामकृष्णभट्टात्मजक ५५
मलाकरभट्टकृतः स्थालीपाकप्रयोगः ॥ समाप्तः ॥ शुभमस्तु ॥ श्रीगणेशाय नमः राम
रामराम ॥ संवत् १८५० शाके १७१५ ॥ शुभं भूयात् ॥ छ छ छ ॥

धर्मशास्त्र

पुस्तक कमलाकर नहीं समाप्तः पत्तरा ४५

श्लोक

१०००